Chap-3

# तृतीयः परिच्छेदः

# अ-रसस्य साम्प्रदायिकता

रसानामुत्पत्तिः रङ्गेस्थायिना सह विभावानुभाव व्यभिचारिभाव- संयोगात् विभावानुभावव्यभिचारिभावैः संयुक्तस्य स्थायिभावस्य वा सफलप्रदर्शनात्कुशलोपस्थानाद्वा भवति। आचार्य भरतमतेन रससत्ता- विषयगता, तत् स्थानञ्च नाट्यमेव। रसः किलास्वाद्यः, न तु आस्वादः, ततुस्थानं सहृदयहृदयं, ततु तदास्वादेन हर्षादीननुभवति इत्थं भरतमतेन रसस्थानं नाट्यरङ्गोवा। रसविषये आचार्यभरतेन कोहलादि- पूर्वाचार्यमतानुसारेण एकादशनाट्योपायाः संगृहीताः। ते तु रसः, भावः,अभिनयः,धर्मी,वृत्तिः,प्रवृत्तिः,सिद्धिः,स्वरः,आतोद्यं,गानं,रङ्गश्च भवन्ति।

रसाभावाह्यभिनयाः धर्मिवृत्ति प्रवृत्तयः।

सिद्धिःस्वरास्तातोद्यं गानं रङ्गश्च संग्रहः।।1 /स्वराऽऽतोद्यं

आचार्यभरतादनन्तरं संस्कृताचार्याणां ध्यानं नाट्यादतिरिच्यकाव्ये- केन्द्रितमभूत्। अलङ्कारवादिभिः रसोऽलङ्कारेष्वन्तर्भावितः। रसस्य परिभाषा तु सैव स्थिता। विभावानुभाव सञ्चारिभावपुष्टस्य स्थायिभावस्यैव रससंज्ञा प्रादीयत्। परं स्वतन्त्रसत्ताकोऽयं रसोः रसवदलङ्कारपोषकं तत्वमभूत्। रसमुक्तोऽलङ्कारो रसवदलङ्कारेतिव्युत्पत्तेः। एतन्मतानुसारेण रसाः स्थितिरलङ्कारविशेषगोचरा, अलङ्कारश्चमूलतःशब्दार्थयोधर्मः। असौरसः स्थितिरपि शब्दार्थयोरेव, इमौ शब्दार्थाविव च काव्यम्। शब्दार्थौ काव्यमित्युक्तेः। इत्थं भामहदण्डिप्रभृत्यलङ्कारवादिभिर्काव्यमेव रसस्थानमिति साधितम्। अलङ्काररीतिवक्रोक्तिसम्प्रदायः केवलं देहवादिनां वस्तुवादिनां वा सम्प्रदायः ध्वन्यौचित्ये चात्मवादिनां। एषामात्मवादिनां सम्प्रदायानां रससिद्धान्तेन साकं तु प्रत्यक्षोघनिष्ठश्च सम्बन्धोऽस्त्येव। स च ध्वन्यौचित्ययोरपि कल्पनाप्रकारान्तरेण समाधृत्यैव व्यधीयत। औचित्यसिद्धान्तप्रवर्तकेन स्पष्टमुपक्रमएवाभिहितम् औचित्यरससिद्धस्यस्थिरं काव्यस्य जीवितम्। आचार्यानन्दवर्द्धनेन तदनुयायिभिश्च सर्वैर्ध्वनिः रसध्वनिश्च काव्यस्योत्तमोत्तमं रूपं मत्वेदं साधितं यत् काव्यस्यात्माध्वनिः ध्वनेरात्मा च रसरीति। वाच्यादतिशयिनि व्यंग्यस्य प्राधान्यं नाम ध्वनिः।2 चारुतयाश्च अस्यनिकषोऽस्ति रसात्मकता। इत्थं ध्वनेर्शुद्धंरूपं रसध्वनिरेवास्ति। अत एव रसध्वनिसिद्धान्तौ प्रायेणैकाकारावेवजातौ, सामान्यतश्च केनाप्याचार्येण तयोर्भेदो न कृतः। अद्यापि तयोर्पृथक्करणं न सुकरम्।

आलङ्कारिकानां मते सौन्दर्यमलङ्कारः, अलङ्कार एव काव्यस्य शोभातत्वम्। कवित्वंखलु अलङ्कारे निहितम्। अलङ्काराः शब्दार्थधर्माः न साधारणधर्माः। अलङ्कारोऽपि द्विविधः सामान्यो विशेषश्च। आचार्य दण्डिना सामान्यालङ्कारेषु वर्ण्यविषयरूपेण कथाशित्याङ्गानि सन्धि- सन्ध्यङ्गादीन्यपि साग्रहं स्वीकृतानि।

तन्मतेन सामान्यालङ्काराणां क्षेत्रं वस्तुतः प्रबंधकाव्यमस्ति। विशेषालङ्कारवर्गेनुप्रासयमकादिः शब्दालङ्काराणां तथा उपमारूपकाद्यार्थालङ्काराणां समावेशो भवति। आधुनिक्यां शब्दावल्यां स्वकीयेव्यापकेर्थे अलङ्कारशब्दः काव्यशिल्पपर्यायः, सीमितेत्वर्थे उक्तियमत्कारस्याभिव्यंजना शिल्पस्यैवेति। अलङ्कारसम्प्रदायस्य जन्म इदमेव मत्वा अभवत्। यत्र रसस्यनादूयेन सम्बन्धः यत्र च विभावानुभावादीनां प्रत्यक्षोपस्थानेन रससिद्धिः सहजतया संभवति। इदमेव तर्कमधिकृत्य शब्दार्थात्मकेन काव्येन तस्य साक्षात्सम्बन्धो न स्वीकृतः नापिस्वीकर्तुं शक्यः। काव्यस्य सारः शब्दार्थसौन्दर्य अलङ्कार एव संभवति। प्रबंधस्य व्यापकेक्षेत्रे अलङ्कारपदेन वर्णनशैलीसौन्दर्यमभिप्रेयते। मुक्तकेषु सूक्तिषु वा उक्तियमत्कारः। अत्रोभयत्रापि सामान्यालङ्कारकल्पना रसाद्गरीयसी न भवति। यतस्तेषां तु रसस्य विभावानुभावपक्षेण प्रत्यक्ष एव सम्बन्धः। काव्यस्य वर्ण्यविषया एव हि विभावानुभावौअलङ्कारवादिन- प्राचीनाचार्येण इदं सम्बन्धसूत्रं नाङ्गीकृतम् अत एव ते काव्ये रसमुपेक्षन्तेत्यनुमीयते। विशेषालङ्कारेषु प्रायश्चमत्कारा प्रवाक्ये सीमितो भवति। अलङ्कारवादिनस्तमिमं शब्दार्थगतं चमत्कारमेव कवित्वस्याधारं मन्यन्ते न तद्व्यञ्जितं भावम्। ते मन्यन्ते यच्छन्दोविशेषस्य सौन्दर्य तत्प्रयुक्तशब्दार्थयोर्गेयता, सादृश्यं, विरोधः सङ्गतिश्चेत्यादिरूपां चमत्कारमयीं कल्पनामेवाश्रितं, कवित्वम्, नत्वेतैरूपकरणैरभिव्यक्तमेव वा भावं विशेषम्। ते शब्दार्थगतेन चमत्कारेणैव साक्षात् काव्यानन्दप्रीतिं मन्यन्ते, ते भावं विजहाति। शब्दार्थगतेन चमत्कारेण सहृदयहृदये कश्चिच्च भावसंस्कारो जागर्ति ततश्च तन्माध्यमेनानन्दप्रतीतिर्जायते इति ते न मन्यन्ते। संभवतो वा न जानन्ति, ते खल्विदमपि न स्वीकुर्वन्ति। परवर्तिनोऽलङ्कारवादिनस्तु तन्महत्वं कार्त्स्न्येनावगच्छन्। जयदेवसदृशं लङ्कारवादिनः काव्यसिद्धान्तास्तावद्रसध्वन्योः प्रभावेणौताश्च प्रोताश्च सन्ति। अयमत्रनिष्कर्षोयदारम्भे तु यावदियं भ्रान्तिरस्थात् यद् रसस्यनादूयेनैवसम्बन्धोऽस्तीति। तावदलङ्कारसंप्रदायेरसः समुपेक्ष्यतापरं भ्रान्तौ निवृतायान्तु रसालङ्कार सम्बन्धो मधुरतरतागमात् विशुद्धालङ्कारशास्त्रीय ग्रंथेष्वपि रसध्वनिसविस्तरं व्यविच्येतामालङ्कारमहत्वं न हीनं, परं रसमूल्यमवर्धता परवर्तिनाऽलङ्कारवादिना स्वयं जयदेवादयः अलङ्कारप्रणेतारः रसस्यापि महत्वं समाम्नन्ति। कल्पनामुद्दिश्य भावस्यतीव्रतां वितरन्ति। एतेऽलङ्काराः न केवलं रसोपकारकाः एव अपितु रसाभिव्यिक्तेरनिवार्यमाध्यमाऽपि सन्ति। परिमितोऽप्रेमभावसौन्दर्य सम्पृक्तशब्दार्थचमत्कृतिं पारिभाषिकशब्दावल्या चित्रकाव्यं यदालङ्कारि सक्ष्यति किं तत्सहृदयमनः प्रीतयेपर्याप्तं स्यादहं मन्ये यदत्रैव रसालङ्कारतारतम्ये निर्णीयते आधुनिकालोचना शास्त्रेऽलङ्कारस्याप्रस्तुतविधानस्यविधानस्य बिम्बयोजनायाः वा महत्वं कटककेयूर समतुल्यम् यथा समयमुन्मुच्यापि निहितं

स्यात्। तदीयं महत्वं शारीरिकाद् रूपरागादप्यधिकमस्ति। तथापि तस्य प्राणात्मात्मतत्वं वा प्रायो नाङ्गीकृतम्।

## आ-रसेष्वकाव्यनाट्ययोः अनिवार्य धर्मः।

नाट्यशास्त्रस्य रचना नाट्यविधानानां प्रदर्शनार्थमेव जाता परन्तु तत्स्पष्टता प्रसङ्गेऽनेके काव्यशास्त्रीया विषयः समागताः। तत्रभरतमुनिना रूपकाणां मुख्यप्रतिपाद्यविषयो रस एव स्वीकृतः।अभिनवभारत्यां टीकायामिदमेव पल्लवितं यत् एक एव तावत् परमार्थतो रसः सूत्रस्थानीयत्वेन रूपके प्रतिमाति।एवं नाट्यशास्त्रस्य षष्ठेऽध्याये रसस्य स्वरूपं स्थायि सञ्चारिसात्विकविभावानुभावरसतत्वं तथा श्रृङ्गारादिरसप्रभेदाः वर्णिताः।'विभावानुभावव्यभिचारिभावसंयोगाद्रसनिष्पत्तिः।(2) इति सूत्रं रसलक्षणे सर्वस्यकृते प्रमाणभूतंजातम्। तदग्रे काव्यशास्त्रिभिर्बहुधा व्याख्यातं च। आचार्यभरतमुनिमतेन यथा गुडादिविभिन्नपदार्थसम्मिश्रणैर्निमित्तं व्यञ्जनमास्वाद्यं भवति तथैव विभावादिसंयोगेन व्यंजितः स्थायीरूपेणास्वाद्यते।'यथाहि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जानारसानास्वादयन्ति सुमनसः पुरुषः हर्षादींश्चाधिगच्छन्ति। तथा नानाभावाभिनयव्यञ्जितान् वागंगसत्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षकाः आनन्दादींश्चाधिगच्छन्ति।' अथ वाल्मीकिहृदये वासनात्मतया स्थितः शोकस्थायिभावः क्रौञ्चवधदर्शनेन रससामग्रीं प्राप्तः। (मृतः क्रौञ्चोविषयालम्बनम्, जीवन्तीक्रौञ्ची चाश्रयालम्बनम्,तद्विलापोऽनुभावः, एतच्चर्वणया (मुनेः शोकः) क्रौञ्चीशोकेन सह तदाकारतां गतः। सेयं मनः स्थितिरलौकिकी, लौकिकशोकभिन्नत्वात्। तदास्वादनं च चित्तद्रुत्यात्मक तयैवोपपन्नम्। यथाजलपूर्णात् घटः समुच्छलति, भावनाविवशा चित्तवृत्तिर्वा स्वतः एव विलापप्रलापाभ्याममिव्यज्यते तथैव शोक भावनातिभरा वेशादुचितशब्दवृत्तयोर्नियन्त्रितः शोकसंतप्तकालमेव वाल्मीकिशोकः श्लोकतयापरिणतः।

अभिनवभारत्यां टीकायामिदमेव पल्लवितं यत एक एव तावत परमार्थतो रसः सूत्रस्थानीयत्वेन रूपके प्रतिमाति । एवं नाट्य शास्त्रस्य षष्ठेऽध्याये रसस्य स्वरूपं स्थायिसंचारिसात्विक विभवानुभाव रसतत्वं तथां श्रृंगारादि रस प्रभेदा वार्णिताः । विभावानुभावव्यभिचारिभाव संयोगाद्रस निष्पत्तिः । इति सूत्रं रसलक्षणे सर्वस्य कृते प्रमाणभूतं जातम । तदग्रे काव्यशास्त्रिभिर्बहुधा व्याख्यातं च । आचार्य भरत मुनि मतेन यथा गुडादिभिर्विभिन्नाः पदार्थः सम्मिश्रणेर्निमितं

व्यञ्जनमास्वाद्यं भवति तथैव विभावादि संयोगेन व्यजिंतः स्थायीरूपेणास्वाद्यते । यथाहि नाना व्यंजनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः हर्षादींश्चाधिगच्छन्ति । तथा नाना भावाभिनय व्यंजितान वागंगान सत्वोपेतान स्थायींभावानास्वादयन्ति सुमनसाः प्रेक्षकाः आनन्दादींश्चाधि गच्छन्ति ।आचार्य भरतः सूत्राधारेणैव रसाःनिष्पन्ति दिशि आरोपवादो अनुमितिवादो भोगवादो अभिव्यक्ति वादश्चेत्यादयो विभिन्नाः सिद्धान्ताः स्थापिताः । रसभेदविषये द्रुहिणस्य मतानुसारेण संख्या प्रतिपादिताः श्रृंगारहास्यकरूण – रौद्र – वीर – भयानकाः । बीभत्साद्भुत संज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः । एते रसाः प्रोक्ताः द्रुहिणेन महात्मनो अत्रैव रसप्रकरणे रति – हास – शोक – क्रोधोत्साहे – भयं जुगुप्सा विस्मय इत्यष्टौ स्थायींभावाः स्वीकृताः। निर्वेद – ग्लानि – शंकाऽसूया – मद – श्रमाऽऽलस्य – दैन्य चिन्ता – मोह – स्मृति – धृति – व्रीडाचपलता – हर्षाऽऽवेगजड्ता – गर्व – विषादौत्सुक्य निद्राऽपस्मार – सुप्त – विवोधाऽमर्षाऽवहित्थोग्रतामति – व्याध्युन्याद – मरणत्रास – वितर्काः इति त्रयस्त्रिंशद् व्यभिचारिभावाः तथा स्तंभ – स्वेद – रोमाञ्च – स्वरभंग – वेपथुवैवर्ण्याश्रुप्रलयो – इत्यष्टौ – सात्विकाः भावाः। इति भेदत्रयात्मकं एकोनपंचाशद् भावाः परिगणिताः । अष्टानामपि रसानां वर्णाः देवताश्च पृथक् पृथक् निर्दिष्टाः । तथा रसानामुल्लेखं सामान्यतया पुनस्तेषां विभावानुभाव व्यभिचारि भाव सात्विकाः

काव्यादर्शनाम्नाऽस्यकृतिरुपलभ्यते। आचार्यदण्डिनारीतिगुणदोषालंकारश्चवर्णितः अयमलंकारान् काव्यशोभाकरान् धर्मत्वेन रीति – रस – गुणाश्चालंकार – साधुत्वेन – स्वीकरोति। अस्य काव्यादर्शे द्वितीये परिच्छेदे रसपेशालानामलंकाराणां प्रतिपादनं दृश्यते । तेन रसवतामष्टावुदाहरणानि प्रदर्श्य रसवदलंकाराणां रसानां वा अस्य संख्यांकत्वम स्वीकृतम । उक्तञ्च इहत्वष्टरसायन्ता रसवन्ता स्मृता गिरम् । एवं श्रव्य काव्य काले भामहापेक्षया दण्डिनोऽपि रसविकासः स्पष्टं परिलक्ष्यते । आचार्य दण्डिपश्चात उद्भटाचार्य संस्कृत काव्य शास्त्रे प्रसिद्धिमगमत । अयं काश्मीपतर्जया पीऽस्यसभापण्डित आसीत ग्रंथे षऽवर्गास्यथैकौनासीत कारिकाः सन्ति तथा चादौ वुप कमे वृत्ति नाम्नी टीकाऽपि प्राप्यते । उद्भटाचार्योऽयमलंकारवादि । अनेनापि भामहदण्डिवत् रसोऽलंकार मध्येऽन्तर्भावितः तत्परम्परैव च स्वीकृता । अस्मात्पूर्वं रसालंकाराणां रसवत्प्रेय – उर्जस्वि – नाम्ना संख्यात्रयमासीत समाहित नाम्ना चतुर्थं रसालंकारोऽनेन वर्धितः । अनेन भामह – दण्डिभ्यामधिकानि रसोदाहरणानि तद्भेदाश्च प्रदर्शिताः अतएव केचिदेनं रसवादिनं कथयन्ति । केचन मन्यन्ते यदुद्भटेन भरतस्यनाट्यशास्त्रे टीका लिखितेति परन्तु साम्प्रतं सा न प्राप्यते नैव च तस्याः निर्मितत्वे अस्तित्वे च किमपि प्रबलं प्रमाणमस्ति । यद्यपि परिवर्ति ध्वनिकाले रसवादिनां लक्षणमुद्भटाद् भिन्नं जातम तथापि आनन्दवर्द्धनादिकृते उद्भट् विहित लक्षणं दिक् प्रदर्शकमासीत। संख्याविषयेऽस्मात् पूर्वं दण्डिनाऽष्टौ रसाः स्वीकृताः । उद्भटस्तु शान्तनामानं नवमं रसं स्वीकरोति । आचार्य वामनः

काश्मीरनरेश जयापीडस्य मन्त्रिपदे उद्भटस्य समकालीनः आसीत । इति युक्ति युक्तं न प्रतिभाति । उदभट्ट पश्चादेव किञ्चित् कालानन्तरं काव्यशास्त्रीय क्षेत्रे वामनस्य प्रादुर्भावो जातः इति प्रतीयते। ।

वामनाचार्य रचितः काव्यालंकारसूत्रवृत्तिः ग्रंथः उपलभ्यते । ग्रंथोऽयं पंचाधिकरणेषु विभक्तः । वामनस्य कृते काव्यस्यात्मा रीतिर्भवति अलंकारापेक्षया गुणानां महत्वं सर्वप्रथमं अनेनैव प्रतिपादितम्। दण्डिमतेन काव्यशोभा कारको धर्मोऽलंकारेवासीत्। परन्तु वामन द्वारा सधर्मो गुणरेषः प्रतिपादितः । अपि च गुणानां काव्ये नित्यतामलंकाराणांचानित्यां प्रतिपाद्य वामनो रस ध्वनिवादिनां समीपमिवायाति । यतो रसः नित्यधर्मत्वेन स्वीक्रियन्ते, अलंकारांश्चा नित्यत्वेन । परन्तु रस ध्वनिवादिनां मते काव्यस्यात्मा रसोऽस्ति वामनमतेन तु रीतिः । एवं धर्म सामान्येऽपि धर्मिरूपेणोभयोर्महदन्तरं जातम् । आचार्य वामनेन अलंकारवादिनां प्रभावः सर्वधा न निरस्तः । अयं हि काव्यं ग्राह्यमलंकारात । इत्यनेन काव्येऽलंकाराणां स्थितिमनिवार्यरूपेणस्वीकरोति । अतो वामनस्य मतेन रीतिगुणालंकाराः परस्परं सापेक्षा आसन् । तथापि रीतिभ्यो गुणानाम गुणेभ्यश्चालंकाराणां कापि न्यूनता वर्तते इति । रस तत्वस्यनेन महत्वं न प्रतिपादितम , रीतिगुणालंकारा एवास्य दृष्टौ महनीयतां प्राप्ताः , रसस्तु काव्यस्य नितान्तम गौणतत्वम । अनेन स्वीकृतेषु दशसु गुणेषु कान्तिःनाम्नो गुणस्य धर्मो रस इति । दीप्त रसस्वं कान्तिः । एवं वामनस्य दृष्ट्या काव्येऽड्गी भूता रीतिः । तस्य धर्माः गुणाः तत्सम्बन्धेन रसोऽपि काव्यांगतां प्राप्नोति । एवं भरतमुनेरनन्तरं वामनाचार्य पर्यन्तं रससिद्धान्तस्य विकासोनाभूत । इमे भरतोक्त रस विषयेऽपरिचिता नासन् । तथापि रसतत्वे येषां मतेन नाट्ये प्राधान्यम् लभते स्म । श्रव्यकाव्ये तु प्रधान तत्वमलंकार एवाश्रयते । तदनन्तरं गुणरीति प्रभृतयो रसाश्च क्वचित्समागतस्य काव्यशोभां वर्धन्ते। कालदृष्ट्या रुद्रटस्याविर्भावो वामनस्य समकाले किंचिदनन्तरं वा संभाव्यते । अस्यकृती काव्यालंकारे भामदण्ड्युद्भट प्रभृतीनामलंकारशास्त्रिणामपेक्षया कतिपये नवाविष्कृताः अलंकाराः प्राप्यन्ते तस्मात्तत्परवार्तिकाल एवास्य संभवति। रुद्रटस्य काव्यशास्त्रीयोग्रंथोऽलंकार संप्रदायस्य परंपरां सूचयति। अस्मिन षोडशाध्यायस्तथा चतुस्त्रिंशदाधिक सप्तशतं श्लोकाः सन्ति। तत्र प्रथमैकादशाध्यायेषु ग्रंथं प्रयोजनं शब्दार्थालंकारविवेचनम् तेषां दोष विवरणम् चास्ति । द्वादशाध्यायात् पञ्चादशाध्यायपर्यतं चतुर्ष्वध्यायेषु रसस्य विशदरूपेण विवेचनमस्ति। अन्तिमे षोडशाध्याये काव्यविधानं चापि वार्णितम् । ग्रंथमध्ये रीतिरुद्रटंकिता परंतुतस्याः महत्वं न प्रदत्तम् एवं गुण विषये त्वनेन मौनमेवालम्बितम्। अतोवामन दण्डि प्रतिपादित रीतिगुण सिद्धान्तेऽस्याऽऽस्थानामासीदिति निश्चीयते। रस सम्बन्धे रुद्रटस्य नूतनोद्भावना प्राप्यन्ते। रुद्रट पर्यन्त रसानां नव संख्या संगच्छते परन्त्वनेन प्रेयोनाम्ना दशमो

रसभेदः प्रतिपादितः। अयं रुद्रट प्रदर्शितो रसभेदो न वात्सल्यमात्रस्यापितु भक्ति रसान्तरगतयोः सख्यदास्ययोरपि प्रेरणाप्रदोजातः। रुद्रटेनकस्यापि भेदस्योदाहरणं न दत्तं तथापि अन्योन्यं प्रति सुहृदोर्व्यवहारो आसीत् इत्यानेन स्पष्टमत्र मित्र विषयक रतिर्गृहयते परिवर्तिकाले भक्तिरसाचार्यैरपदमेवानुसृतम्..स्थायी भावोविभावाद्यैः सख्यामात्योचितैरिह। रुद्रट कालान्नाट्रस्य रस एव नाविशिष्टोऽपितु काव्य रसोपि जातः । तस्मात तत्कर्तव्यं यत्नेन महीसया रसैर्युक्तम्। इति कथनेन तेन काव्ये रसतत्वस्य महत्वं प्रतिपादितम्। अनेन पुनः पूर्ववार्तिभिरिवालंकाराचार्यैरिव रसो रसवदलंकार मध्येऽपि नान्तर्भावितः। अतोनायं सर्वथा रुद्रट्वादिनां भामहादीनामलंकारशास्त्रिणामनुवर्त्याचार्यः। रसस्यविस्तृत निरुपणदेवास्य रसवादितापि न सिध्यति। अतोऽयं रस संप्रदाये न समाधिगच्छति तथापि रसस्य विकासेऽय महोयोगः स्वीकार्यः। रुद्रटस्य रसो नालंकारवादिनमिव गौणतामुपगच्छति न च पुनः रस ध्वनिवादिनमि व सर्वप्राधन्येन तिष्ठति। रसविरोधिन्या अलंकारवादिन्या वा धारायाः समानान्तरतयाऽपरतो रसवादिनि धारापि प्रवहत्। कालानुक्रमेणास्यां परंपरायां प्रथमोलोल्लटः आसीत्। लोल्लटेनस्वकीये लधुन्युद्धरणेऽपि भरतसूत्रं मनोयोगेन व्याख्यातम्। रसस्य दार्शनिकी प्रतिष्ठापयितुं चेष्टितम् तेन तस्य रस वादितायां न नापि संशयः समुदेति। अपराजित पुत्रस्य भट्टलोलट्टस्य मतमिदं यदसीमन्यप्यर्थ समवाये काव्ये तु सरसस्यायैवार्थस्य निबन्धनमुचितम् न नीरसस्य। लोल्लटेन स्व व्याख्यायां भरतादनन्तरं इदं प्रथमतया रसस्वरुपम् निरुपयितुं प्रयतितम्। इत्थम् स्वयुगीनाचार्यन्तरवच्च रसस्य शब्दार्थगिरा नोंगीकृत्य मानभाव परिणतिरूपतामुररी कृत्य च तेन रस सिद्धान्तो नूनमूदाकृष्यत्। तेन स्थायेवविभावनुभावादिभिरुपचितो रसं इति । मूलतो रसाः अनन्ताः किन्तु नटेप्रतीयता नाट्येष्टावेव रसाः प्रयोज्या बति च । लोल्लटात्परं रससुत्रास्यापरं प्रसिद्धो व्याख्याता श्रीशंकुकः । नाम्नाऽसावपि काश्मीरिकः प्रतिभाति। अभिनवगुप्तेन हि उद्भटस्य लोल्लट इव लोल्लटस्यशंकुकोपि प्रतिवादि तयोपन्यस्तः अभिनवभारती प्रभृतिषु ग्रंथेषु प्राप्तानि शंकुकोदाहरणानि तस्य रसं प्रत्याग्रहं सवर्था प्रस्फुटयन्ति। शंकुस्य दार्शनिकी पृष्टभूमिः हि भट्टलोलट्टाद्पि दृढीयसी गंभीरतरा चास्ति। स रसं शब्दार्थयोर्निम्न भूमेरूत्थाप्यापुमानादि मानसिक क्रिया ' रस सिद्धान्तस्य महत्वं प्रतिष्ठापितम् । ध्वनिवादात्पूर्वं रसवादिन्या धारायांश्चसायमाचार्यो रुद्रट्भट्टः। यद्यपि कतिपये विद्वांसोऽस्याविर्भावकालः आनन्दवर्द्धनादनन्तरं दशमीशताब्दीं मन्यते । रुद्रटभट्टेन श्रृगांरः सविस्तरेण साभिरुचिं च विवेचितः । न केवलं सैद्धान्तिक दृष्ट्या अपितु व्यावहारिक दृष्टयापि कालिदासस्य काव्यानि रसमयानि सन्ति । रसस्य यावन्तिक प्रचुराणि परिष्कृतानि चोदाहरणानि कालिदास प्राणीतेषु दृश्य श्रव्येषु उपलभ्यन्ते तावन्ति

तावदन्यत्रासुलभनि । तेन चित्तद्रुतिं मानव संवेदनां रसस्य मूलधर्म पश्यता करूणस्यैव रसत्वमुद्‌घोषितम्‌ ।

# ३- रसोकाव्यस्यात्मा।

काव्येआत्मेति शब्दः काव्यानिर्यव्यापकाभ्यन्तरं सार तत्वमिति ज्ञेयं। तत्‌ तत्वं तत्र साधनत्वेन समुपतिष्ठते। काव्यशास्त्रे आत्मेत्यस्य प्रयोगः सर्वप्रथमम्‌ वामनेन रीतेः काव्यस्यात्मत्व प्रतिपादने कृतः । रीतिरात्मा काव्यस्येति स निजगाद्‌। आचार्यआनन्दवर्धनो ध्वनिः काव्यस्यात्मतत्वमिति प्रोक्तं । विश्वनाथस्तु रसं काव्यस्यात्मत्वेन मेने । आचार्य कुंतको वक्रोक्तिं काव्यस्यात्मेति जगाद्‌। एतेषु लक्ष्येषु गुणसाम्यंप्रति वाच्यवाचकवृत्तिः प्रयोगेन ध्वनितत्वस्य अलंकारेष्वन्तर्भवनं तदिष्टामिति सिध्यति। आभावादिना अस्मादेव संस्कृतकाव्यशास्त्रयेतिहृया ध्वनिसमयप्रसारमानन्दवर्धना खण्डनमूकृतम्‌। अस्मिंस्वाऽऽनन्दवर्धनभट्टनायकभट्टतोतराजशेखरकुन्तकाभिनवगुप्तधनञ्जय महिमभट्टक्षेमेन्द्रभोजराजादयः परिगण्यन्ते। अत्रयुगे संस्कृतकाव्यशास्त्रस्याधारभूतानां सिद्‌धान्तानां गंभीरं विवेचनं तर्कवितर्कपुरस्रं तेषां स्थापनं स्थिरीकरणं च समजनि। अस्य युगस्य महीयसी चोपलब्धिर्ध्वनिसिद्‌धान्तस्याविस्कारः। तस्य च प्रकाशे काव्यस्य सिद्‌धान्तान्तराणामवधारणम्‌। इतिपूर्वस्मिन काले ये सिद्‌धान्ता उदभाव्यन्त तेष्वेकस्य दृष्टिविशेषस्यैवोन्मेषः आसीत्‌ । अस्य युगस्य तु सार्वभौमसिद्‌धान्तानामनुसंधानं विशेषः। मूलतो ध्वनिस्थापना रसाद्‌भिन्नरुपा परं व्यवहारे ध्वनिवादिभिरेवोत्कर्ष नीतंः । इदं वस्तुतो रससिद्‌धान्तस्य सुवर्ण युगम्‌। एकतोऽत्र भट्टनायकभट्टतोताभिनवगुप्तराजशेखरधनञ्जयमहिमभट्टाः प्रत्यक्षतो रससिद्‌धान्तममण्डयन्‌ । परतस्त्वानन्दवर्धनो रसध्वनिनिरुपणेन क्षेमेन्द्रस्य रसगतौचित्यप्रतिपादनेन तस्य गौरवं प्रतिष्ठापितम्‌। भोजराजस्य दृष्टिस्तु समन्वयवादिनी. स काव्ये ध्वनिप्रधान्येन सह रीत्यलंकारसमादरमप्यंगीकरोतिस्म तथाप्यसन्दिग्धस्तस्य रसं प्रति बहुमानं। केवलं कुन्तकं एव तादृगाचार्यः यो वक्रोक्तिनाम्ना भिन्नं सिद्‌धान्तं प्रतिपादितदम्‌। अस्यापि न रसं प्रति वैमत्यम्‌। इदं सुवचं यच्छब्दार्थकतां काव्यजीवितम्‌ मानवस्यापि तस्य रसं प्रति जागर्त्येव कस्य व न गौरवविशेषः।

केचन सन्तिरसस्य प्रत्यक्ष समर्थकाः परं तेषां मध्ये अस्याग्रणीर्भट्टनायकः। तस्याविर्भावकालस्वाभिनवगुप्तात्वपूर्वानन्दवर्धनाच्च पश्चाद्‌ दशमशताब्यां उत्तरार्धे मन्यते। भारतीयकाव्यशास्त्रस्य दुर्देवात्‌ तदीयो हृदयदर्पणो नाम ग्रंथोद्य नामशोषतां

गतः। अभिनवगुप्तस्य तत्वपरिवर्तिनां काश्मीरिकाणां शैवाद्वैतवादिनां कोविदानां तर्कघटाटोपे `भट्टनायकस्य मनोवैज्ञाकितरः सिद्धान्तचन्द्रो विलुप्तः । भट्टनायकोऽपि नूनं शैवानन्दवाद्य भूतः । तन्मतेनेदं जगन्नाट्यतुल्यम यतं प्रयुज्यमाने मनः अनवरतं रसमास्वदन्ते ।

अभिनवगुप्तोपि भट्टनायकमिव जगन्नाट्यं प्रतिजानीयते. शान्तरसच्च मूलरसं।
"स्वं स्वं निमित्तमासाद्य शान्तादुत्पद्यते रसः।"
इत्यभिनवभारत्याम्। भट्टनायकः किल हृदयवादी समालोचकोऽभूत् । स हृदयस्य परिपूर्णतामेव काव्योद्गमस्थलीम् मन्यते। भट्टनायकः काव्ये रसचर्वणामेव जीवितं मन्यते - काव्ये रसयिता सर्वो न बोद्धा न नियोगभाक् ।

भट्टनायकः साधारणी करण सिद्धान्तोद्भावनया काव्यास्वादस्य मौलिकी समस्यां मतिमार्मिकतया समादधौ, रसस्य च सामाजिकगत्वेनानुभूतिमेव प्रमाणायन् रसस्यात्मगतं स्वरूपमभ्यान्तशब्देरूदजिघटते । एकतो लोल्लटादयो रसस्वरूपमेकान्ततो वस्तुनिष्ठम्, अपरतःवाभिनवगुप्तादयस्तदात्मनिष्ठं मन्यते। अनया च भट्टनायकस्य रसभोगवादो व्यवहारिकतरं इत्यसन्दिग्धम् ।
भट्टनायकस्य समयेन समो भट्टतोतोऽपि तत्र योगमदादिति बहुधानुमेयम । तद्ग्रन्थः काव्यकौतुकाख्योऽपि सम्प्रति कथामात्रशेषः । अभिनवगुप्तेन ध्वन्यालोकलोचनेऽभिनवभारत्याञ्च स्वकीयोऽयमुपाध्यायः सादरम्मरं स्मृताः ।अभिनवगुप्तातिरिक्तेन हेमचन्द्रेणापि काव्यानुशासननाम्नि स्वग्रन्थे प्रतिभाप्रसंगे भट्टतोतस्य कतिचिदुद्धरणानि निहितानि ।
अभिनवभारत्याम् अध्यायद्वये भट्टतोतमतानिं निरूपितानि षष्ठेचैकोनविंशे च । तत्र षष्ठे भट्टतोतः श्रीशंङ्कुकस्य रसनुकृतिवादं निरस्य भरतोक्तस्य रत्यादिपरिपोषस्यैव रसत्वं साधयति, बाधयति च रत्याद्यनुकृते रसस्य । नटे रस स्थितिं निराकृत्य सामाजिकनिष्ठां तां प्रतिपादयन्ती,रसञ्चाभिनयकलातःकस्याञ्चिदुच्चभूमिकायां-सहृदयचित्तवृत्तौ- प्रतिष्ठापयति ।एकोनविंशेत्वध्याये भट्टतोतस्य केचिदेवंविधाः श्लोकाः समुद्धृताः, ये लक्षणगुणालंकारवृत्यादीनां काव्यतत्वानां परस्परानुकूल्येन रसव्यञ्जकत्वमुद्घाटयन्ति । तथा चोक्तं भट्टतोतेनेत्यारभ्य-
लक्षणालंकृतिगुणाः दोषाः शब्दप्रवृत्तयः।

येःखल्वसौलक्षणाल
ङ्कारगुणदोषशब्दप्रवृत्तिवृत्तिसन्ध्यङ्गेष्वभिनिवेशःकवेरावसयकोपकरणत्वेनोपदिस्यतेतत्रैषामन्योन्य ।नुकूल्येन सम्भूयोत्थानमपेक्ष्यते । एतादृशैकाह्लादिभिर्गुणैर्यत्र सहजतया

रसोऽभिव्यज्यते, यस्य च रचना सरलबन्धैश्छन्दोभिः कोमलस्निग्धाद्द्रुतैश्च प्रयोगैः सहसुप्रतीतयाभाषया तथा विधीयते। यथा संघटना श्लेषरहितत्वेन सहृदयहृदयप्रिया प्रतीयते। एतादृशं यद्यपि काव्यं तद्रसभावानुभावनाय कल्पते। इदं काव्यं वाच्याभिनयसंज्ञया सामान्याभिनयप्रसङ्गे निरूपितम्।एवंविधे कृत्स्नेऽपि वस्तुनि कथार्पिते, अन्यूनाधिकेचैतादृशिसामग्रीसंग्रहेरसोन्मेषो भवतीति। अत्ररसः साध्यः काव्यस्य तत्वान्तराणि च साधनानि। भट्टतौतो रसाग्रहितयैव नाट्ये गीतप्रोक्तम् सविशेषमिच्छति। अत्राभिनवगुप्तोक्तिः अस्मद्गुरवः श्रीमद्भट्टतौतास्तु मन्यते नाटये गीतैरेव रसास्वाद इति प्रमाणम्।

प्रतिभाप्रसंगे च प्रमानुप्रेरणं कवेः प्रधानं धर्मःघोषयता तेन किलात्मवादिनः काव्यसिद्धान्तस्य पुष्टि कृताः। अस्ति च रस सिद्धान्तविकासे भट्टतौतस्यं मुख्यो योगः यदसौ सुस्पष्टतया रसचकान्तः कवेरनुभवनमपि समावेशयति स्म इत्यच्च साधारणीकरणप्रक्रियायां नायकसामाजिकयोर्मध्ये माध्यत्वेन कविं प्रतिष्ठापयति स्म....

नायकस्य कवेः श्रोतुः समानोऽनुभवस्ततः।। इति..

वस्तुतः साधारणीकरणवृतम् कविमन्तरा न पूरणीयम् रससन्दर्भे कवेरनुभूतावुपेक्षितायां भारतीयस्य काव्यशास्त्रस्य महत्वशालीदममंगमपूर्णमेव स्थितम। भट्टतौतसंकेतेनोचिते दिगनिर्देशे कृतेऽपि तात्कालिक्यां काव्यशास्त्रीयपरंपरायामस्य प्रवेशो न समभूत।

रस सम्प्रदायस्य प्रमुखतमोआचार्योऽभिनवगुप्तः प्रसिद्धयति । तस्य हि कान्तदर्शिनी प्रतिभारससिद्धान्तैतिह्ये कान्तिमुपातिष्ठयत् काव्यशास्त्रेण तस्य द्वौ ग्रन्थौ सम्बन्ध्ये-ध्वन्यालोकलोचनम् अभिनवभारती चेति । ध्वन्यालोकलोचनेनासावानन्दवर्धनस्य ध्वनिसिद्धान्तं व्यशदयत् अभिनवभारत्यां च भरतस्य नाट्याशास्त्रम् । वस्तुतो रसेरसध्वनौ च कश्चन मूलतो भेदः । तथापि रससम्प्रदायाद् ध्वनिसम्प्रदायस्य भेदो व्यावहारिकदृष्टयाऽवदातः । आधुनिकस्याऽऽलोचनांशास्त्रस्य शब्दैरयमनुभूतिकल्पनयोः प्राधान्येन कृतः । उभौ चेमौ सम्प्रदायावनुभूतिकल्पनयोरनिवार्यमन्योन्याश्रयिता मन्यते, बलाबल भेदस्तूभयत्र स्पष्टः । बलाबलनिकषकषणे नाभिनवगुप्तस्य रसं प्रत्याग्रहो विशदीभवति।

तेन रस एव वस्तुतः आत्मा वस्तलंकारध्वनो तु सर्वथा रसं प्रति पर्यवस्येत इति वाच्यादुत्कृष्टौ तावेत्याभियाधेण ध्वनिः काव्यात्मेति सामान्यकन्योक्तम्।

इति तेन ध्वन्यालोकलोचनेअन्यच्च..

, योक्तम्.. धमार्थकाममोक्षेषु वैचण्य कलाषु च,

करोति कोति प्रीति च साधूकाव्यनिवेशणम्।।. इति।

तथापि तत्र प्रीतिरेव प्रधानम्। अन्यथा प्रभुसम्मितेभ्यो वेदादिभ्यो मित्रसम्मितेभ्यश्वेतिहासादिभ्यो व्युत्पत्तिहेतुभ्यः कोऽस्य काव्यरूपस्य व्युत्पत्तिहेतोर्जायासम्मितत्वलक्षणे विशेष इति प्रधान्येनानन्द एवोक्तः । चतुर्वर्गव्युतपत्तेरपि चानन्द एव पार्यन्तिक् मुख्यं फलम्।

प्रधान्यादिति रसपर्यवसानादित्यर्थः । तावत्मात्रविश्रान्तवपि चान्य शास्त्रवैलक्षण्यकारित्वेन वस्त्वलंकारध्वनेरपि जीवितत्वमौचित्यादुक्तमिति भावः। इत्यपि तेनैवोदटिंक। एतैरुद्धरणैश्चैतत्सिध्यति यद्ध ध्वनिकारो रसं प्रति पक्षपातं प्रदर्शयन्नपि वस्त्वलंकारध्वनि मुक्ताभावेन ग्रहणाति तत्रभिनवगुप्तो रसं प्रति दृढाग्रहग्रहिलः संस्तौ सायासं स्वीकरोति। ग्रंथकारभास्यकारोकयं दृष्टिभेदोऽन्तपर्यन्तं स्थितः वस्तुतोऽभिनवस्य दर्शनं शैवाद्वैतम् यत् परमतत्वस्यानन्दाद्वैतमयी स्थिमात्रितम्। शैवाद्वैताश्रयभूतमिदं किलानन्दतत्त्वतद्वैततयाऽखण्डमनादि च विययते तस्याभिवक्तिमात्रं भवति नोत्पत्तिः। इत्यर्थं। शैवाद्वैताभिवक्तिवादः खल्वानन्दवादसाधकसिद्धान्तत्वेन साग्रहमंगीक्रियते। अभिनवगुप्तेनास्मादेव हेतो रससिद्धान्तसाधकत्वेन ध्वनिसिद्धान्तः समनोयोगादृतः स नूनं मूलतो रसवादी ध्वनिरपि तस्य रसविषयिण्या धारणायां पुष्टयेऽनिर्वायतया स्वीकार्यः। । उभयोरप्यनयोर्ध्वनिरससिद्धान्तयोराचार्यस्याभिनवगुप्तस्य निष्ठायाः इदमेव स्पष्टतम् प्रयोजकम्-

संसारनाट्यजननाधातुबीजलताजुषाम्।
जलमूर्ति शिवापं पत्युः सरसां पर्युपास्महे।। इति।

„यावन्निजहृदयरसविलसदिव्कस्वरनिर्वारचत्कारपवित्रता न जाता भागवत इव। ताविच्छक्षाशतैरपि वैचित्रयमनाहार्यम्। इति च नाट्यसूत्रस्याभिनवभारत्याम्।

स्वकीयेषु दर्शनग्रंथेषु प्रत्यभिज्ञादर्शनप्रकाशेऽभिनवगुप्तेन रसतत्त्वमद्भुततया व्याख्यातम्। अत्राभिनवभारतीयोरपि मूलकारिकाव्याख्यानेन सार्कं रससिद्धान्तस्य प्रायः सर्वेपि प्रसंगाः स्वातन्त्र्येण गाम्भीर्येण च विमृष्टाः यस्य प्रभाववोधोपि भारतीये रसशास्त्रे व्यापकतयाऽक्षुण्यतया च विराजते।

रसस्यरुपस्य तन्निष्पत्तेश्च सन्दर्भेऽभिनवेन पूर्वार्तिन उत्पत्तिवादानुकृतिवादभुक्तिवादप्रभितयः सिद्धान्ताः बलवत्युदिताः। अभिव्यक्तिवादश्च द्रढीयस्यां दार्शनिक्यां भूमिकायां प्रतिष्ठापितः। रस्यानुकार्यानुकर्तगत्वते प्रतिविध्य सहृदयगत्वतं तेन समादृतम्। इत्यच्च रसस्य वस्तुनिष्ठत्वं निरस्य विशुद्धो व्यक्तिनिष्ठो वात्मनिष्ठस्तदास्वादः प्रतिपादयतिः।

"अस्मन्मते तु संवेदनमेवाऽऽनन्दधनमास्वाद्यतम्" इति।।

साख्यमतप्रभावितम् रसस्य सुखदुखात्मकम् स्वरुपम् यद्यपि भट्टनायकेनैव निरास्यात् तथाप्यभिनवगुप्तः शिवाद्वैतप्रकाशे निर्भ्रान्ततया तन्निराकृत्य रसस्यैकान्तानन्दमयी हवदैवमयी वा स्थित प्रत्यपीदत्..

"अन्ये त्वादिशब्देन शोकादीमत्र संग्रहः। स च न युक्तः। सामाजिकानां हि हर्षफलं नाट्यं न शोकादिफलं।। " इति।

अनया दृशाभिनवगुप्तेन रसाभिव्यक्तेर्मुख्यं माध्यम् रुपकमेवेतिनिरुपितम् किन्तु प्रबन्धकाव्येपि वाग्वेषादिकल्पनया वर्णनचमत्कृतया च रसस्य स्थितस्तस्य सवर्था सम्मता प्रबन्धोपजीव्यतया च मुक्तकेपि। तथाहि।।...

"तद्रूपसमर्पणतया तुप्रबन्धे भाषावेषप्रवृत्यौचित्यादिकल्पनपत् तदुपजीयनेन मुक्तके। "
इति।
तथा च तत्र सहृदयाः पूर्वापरमुचितमं प्रकल्प्य.. ईद्दगत्रवक्तामिन्नवसर, इत्यादि बहुतरं पीठबन्धं रुपं विशुद्धे। इत्युक्तममिनवमरत्याम्। मुक्तच्चेति।

यद्यप्ययमाचार्यो विभावानुवव्यमिचारिमात्रप्राधान्येनापि रस सिद्धसम्भवं मन्यते तथापि तस्या पूर्वोत्कर्षो रसवयवानां समप्रधान्येनैव सम्भवतीति स पश्यति..
"किन्तु समप्राधान्य एव रसास्वादस्योत्कर्ष, इति।

अभिनवगुप्तेन भरतस्य गुरुभट्टतोतस्य च सांकेतेन रसस्य कविगत्वमपि विशदं व्याख्यातम्। भारतीये काव्यशास्त्रे रसस्य कविगतत्वमियत्वा प्रामाणिकतयान्यत्रोल्लिखतं नोपलभ्यते । तद्रयथा.."कविगतसाधरणीभूतसंविन्मूलश्य काव्यपुरश्वरो नटव्यापारः। सैव च संवित्पर्यभारतो रसः। सामाजिकस्य तत्प्रतीत्या वशीकृतस्य पाश्चादपोद्धारबुद्धया विभावादिप्रतितिरित। तदेवं मूलवीजस्थानीवः कविगतो रसः। "
इति।

अतः परं कविगतस्य सामाजिकगतस्य च रसस्य मिथं सम्बन्धं व्याचक्षाणेनाऽऽचार्येणोदलेखि—कविर्हि सामाजिकतुल्य एव। तत एवोक्तं श्रृंगारी चेत्कविः काव्ये इत्याद्यानन्दवर्धनाचार्येण। ततो वृक्षस्थानीयं काव्यंम, तत्र पुष्पादिस्थानीयोऽभिनयादिर्नटव्यापार, फलस्थानीयः सामाजिकरसास्वादः । तेन रसमयमेव विस्वम ।

भरतस्त्वोषधिव्यञ्जनादिदृष्टान्तेन रसपरिपाकं व्याचक्षे । अभिनवेन शास्त्रीया दृशा तद्विशदीकृत्य रसपरिपाकतदास्वादविषयकाः प्रश्नाः प्रभूतं प्रकाशिताः, समाहिताश्च । तथैव रसानामुत्पाद्योत्पादकसम्बन्धोऽप्यभिनवभारत्यां विशदं व्याख्यातः। प्रस्तुतेऽर्थे च भरतेनैतावदेव प्रतिपादितम..श्रृंगाराद्धस्यः, रौद्रात्करुणः, वीराददूभुतः बीभत्साच्च भयानको जायते । कथम्? श्रृंगारस्य ह्यनुकृतिर्हास्यम, रौद्रस्य कर्म करुणम्, वीरस्य चाद्भुतम् । यत्र च वीभत्सो दृश्यते तत्र भयानकोऽप्यवगन्तव्यः । अभिनवगुप्तेन सविस्तरं शास्त्रीया सम्बन्धस्वतुर्घा निरुपित, अनुकृत्याभासोभयात्मकः, व्यवहितफलात्मकः, अव्यवहितफलात्मकः, तुल्यविभावत्वेनाक्षेप्यस्वेति।
लोल्लटप्रतिपादितं रसानन्त्यं निषिध्याभिनवेन नवैव रसाः स्थिरीकृताः, शान्तश्च महारसपदे प्रतिष्ठापितः। शान्त प्रति भूयांस्तदाग्रहः, येनासौ मुहुर्मुहुर्नाट्यशास्त्रस्य तत्संस्करणं समुद्धरति, यत्र भरतेन शान्तस्यास्तित्वमंगीकृतम। अभिनवभारत्यां शान्तेन सह श्रृंगारोऽपि महता ग्रन्थेन निरूपितः। इत्थं रसं प्रति तदाग्रहो निश्चीयते। विचीयते च तदीयस्य रसविवेचनस्य व्यापकत्वं गम्भीरत्वं बलवत्तवञ्च । परिचीयते च भारतीयरसशास्त्रेऽभिनवगुप्तस्यान्यतमं स्थानम्। राजशेखरः (कालक्रमेणाभिनवगुप्तात्पूर्ववर्ती) प्राधान्येन कविशिक्षां प्राणैषीत्, परन्तदीयविचारस्य

परिधिर्व्यापकतरः, तदीया दृष्टिश्चाधुनिकी। तदीय रसविवेचनं संक्षिप्तम, परं तन्महत्वावलोकने नितरामनाविला तद्दृष्टिः....शब्दार्थो ते शरीरम्...रस आत्मा; इत्यादिरुपा। अत्र सरस्वती स्वपुत्रं काव्यपुरुषं स्तौति। अर्थव्याप्तिनिरूपणप्रसंगे चायं भट्टलोल्लटमुदाहरन पुनरपि रसमहत्वं निरूपयत्.....

"रसवत एव निवन्धो युक्तो न नीरसस्य ।"इति।

प्रकृतिवर्णन भोतिकपदार्थवर्णन वा रसानुगुणाता। विना रमणीयमपि महनियमपि काव्यस्य कृतेऽपर्याप्तं मन्यते राजशेखरः । तथाति----

मज्जनपुष्पावचयनसन्ध्याचन्द्रोदयादिवाक्यमिह ।
सरसमपि नातिबहुलं प्रकृतरसानन्वितं रचयेत ।।
यस्तु सरिदद्रिसांगरपुरतुरगरथादिवर्णोने यत्नं ।
कविशक्तिख्यातिफलोविततधियां नों मतःसइह।इति ।

अनेनानुवंश्योद्धरणेन राजेशेखरस्तैः सहैकमत्यं ख्यापयति आमिति यायावरिय इति। अत्र रसपदं वस्तुसौन्दर्य भिन्ने भावसौन्दर्यरूपे विसुद्धे शास्त्रीये रसपदार्थ प्रयुक्तम्। भारतीयं हि काव्यं प्रकृतिकवैभवेन देदीप्ते' तथापि भारतीये रसशास्त्रे प्रकुतिरालम्बनविभावपदं नाध्यगच्छत। रसपरिपाकाय प्रतिक्रियाप्यपेक्ष्यते, नालं किल तस्मै क्रियामात्रम। एतमेव तर्कमधिशयूयास्य प्रतिक्रयाशक्तिवञ्चिता प्रकृतिर्नालमभूद रसपरिपाकाय। राजशेखरः काव्यमीमांसायां नवमेऽध्याये भारतीयरस शास्त्रेस्येदमेव महनोयं तथ्यं प्रत्यपादयत्। सोऽमन्यत्। प्राकृतिकानि रमणीयानि दृश्यानि वर्ण्यमानानि मनो हरन्ति,परं तेषु सरसत्वं मानवीयाभीरेव भावनाभिर्भियते। सरिदद्रिसागरपुरेतुरंगरथादिवर्णनेषु कथं मानवीयभावनासंस्पर्शजा सरसतोदेतीतीदं तेनोपयुक्तैरुदाहरणैर्गम्भीरं विवेचितम्।

"प्रद्धा तद्वास्तु वस्तुरुपम, रसवत्वं तु कविप्रकृतिमाश्रितम" इति उपाल्यकीर्तिः।

"नास्ति किमपि वस्तु नियतस्वरूपम, प्रत्येकं हि परिवर्तते वस्तु" इत्यवन्तिसुन्दरी। इत्थमिदं रसस्य कविगतत्वं भारतीये काव्यशास्त्रे नूनमूरीकृतपूर्वम,पश्चातु सहृदयगतत्वेन प्रसरता कविगतत्वमाच्छादितम । राजशेखरस्तेषु स्वतन्त्रचेतस्वाचार्येषु प्रतिष्ठतः, यैरिदं विशदतया व्याख्यातम।

अस्मिन्युगे रससिद्धान्तस्य साक्षात्समर्थकं ग्रन्थान्तरं दशरूपकं नामापि विश्रुतम। इदं भरतनाट्यशास्त्रमाघृतम । अतो गन्थकारस्य धनञ्जयस्य तत्समसामयिकस्य वृत्तिकारस्य धनिकस्य च रसे निष्ठावत्वं स्वाभाविकम । दशरूपकस्य चतुर्थे प्रकाशे रसस्वरुपम, काव्यरसयोः सम्बन्ध, रसविरोधपरिहारौ, शान्तो रसस्तस्य च नाट्येऽसिद्धत्वम, विविधानां रसानामवयवा भेदाश्रव सावहितं स्पष्टं च निरुपिताः । धनञ्जयधनिकौ भावविभावादिनिरूपकयोः शब्दार्थयोः काव्यत्वम, रसेन सह चास्य भावकभाव्यत्वं न तु व्यञ्जकव्यंग्यत्वं नाम सम्बन्धं प्रतिपादितवन्तौ । आनन्दवर्धनाभिनवगुप्तपरम्पराविलक्षणो भट्टलोल्लटशंकुकभट्टनायकानां

प्रभावस्तयोर्लक्ष्यते— 'काव्यशब्दानां चान्वयव्यतिरेकाभ्यां निरतिशयसुखास्वादव्यतिरेकेण प्रतिपाद्यप्रतिपादकयोः प्रयोजनान्तरापलब्धेः स्वानन्दोद्भुतिरेव' कार्यत्वेनावधर्यकम' इति।

इत्थं काव्ये शब्दप्रयोगो विभावादि-स्थायिभाव-रसानां प्रतिपत्तये भवति तत्राति विभावादयः स्थायिभावस्य रसस्य च प्रतिपादकाः, रसभावौ च तेषां प्रतिपाद्यौ। काव्य तत्छन्द-विभावादि-स्थायिभाव-रसनामन्योन्यसम्बन्धपर्यालोचनया काव्यात्मकस्य वाक्यस्यैकमेव प्रसयोजनं नः प्रतिमति-सहृदयान्जराननदोद्भूतिरिति। इदमन्तरा काव्यस्य प्रयोजनान्तरं नोपलभ्यन्ते, तस्मादानन्दोद्भूतिरेवैकं काव्यस्य कार्यमिति।

धनञ्जयधनिकयोः काव्यचमत्कारो न रसपदार्थः, अपि तु विभवादिस्थायि-भवाभ्यामानन्दोद्भूतिरेव। अतएव—

"तदद्भुतं तेनिमित्तत्वञ्च विभावादिसंसृष्टस्य स्थायिन एवावगम्यत" इत्युक्तम् ।

अतो दशरूपके रसः काव्यशास्त्रीये विशुद्धे पारिभाषिकेऽर्थे स्थायिभावास्वाद-रूप एव प्रयुक्त इति स्पष्टम् ।

महिमभट्टः—अस्मिन्नेव युगे मेधावी महिमभट्टो नामाचार्यो ध्वनिवादं निरस्यन् काव्यस्य रसात्मकतामभ्रान्तैः शब्दैरन्वमोदयत्—

"काव्यमात्रस्य ध्वनिव्यपदेशविषयत्वेनेष्टत्वात्तस्य रसात्मकत्वाकपगमात्" इति।

व्यक्तिविवेक काव्यमात्रं ध्वनेविशेषः वस्तुतो यत्रं यत्रं रसस्तत्र तत्रैव काव्यत्वम् इति तस्याभिप्रेतम्।

"तस्य रसात्मकताभावे मुख्यवृत्या कयव्यव्यपदेश एव न स्यात्, किमुत विशिष्टत्वम्"।

इत्युवत्या चेदं विशदीकृतम, यदिह काव्यस्यात्मा रसादिरेवेति, तच्च न कस्यचनापि विमतम। तथाहि...."काव्यस्यात्मनि संज्ञिनि रसादिरूपे न कस्यचिद् विमति" रिति तदुतिम।

अस्य रसस्य चापूर्व महत्वम्.....

पाठ्यादथ ध्रुवागानात् ततः सम्पूरिते रसे।
तदास्वादभरैकाग्रो हृष्यत्यन्तर्मुखः क्षणम्।।
ततो निर्विषयस्यास्य स्वरूपावस्थितौ निजः।
व्यज्यते ह्लादनिष्यन्दो येन तुष्यन्ति योगिनः।।

इति तत्रैवोदाहृतम्। रसाभावे तु प्रहेलिकादयोऽवशिष्यन्ते न काव्यम् । अमुनैव तर्केण महिमभट्टः काव्यभेदान्निरस्यति...नास्ति रसध्वनिः, नालंकारध्वनिः, नापि वस्तुध्वनिप्रभृतिः, न ध्वनिर्न गुणीभूतव्यंग यादि। एवमेव यत्र रसोऽस्ति तत्र रसचमत्कृतिसत्वेन गौणत्वं न सम्भवति। नीरसं च काव्यमकाव्यम, रससत्वे च न भणनीयं तदितरस्य गौणत्वमिति। तदेवोक्तम।

"किन्च मुख्ये रसात्मनि काव्ये सम्भवति न तस्य गौणस्याश्रयणं युक्तम ।"

इति संस्कृतकाव्यशास्त्रे रसस्येतो बलवत्तरं समर्थनमसुलभम्। रसस्याप्रत्यक्षं समर्थनम्.. इत्यपरो वर्गः। यत्र ध्वनिसमयस्य प्रमुखयोराचार्ययोर्नमिनी स्मर्येते...आनन्दवर्धन इति क्षेमेन्द्र इति यद्यपि नूनमेताभ्यामेव रसात्पृथग् यथाक्रमं ध्वनिसम्प्रदायः, औचित्यसम्प्रदायश्चेति संम्प्रदायौ प्रवर्तितौ,किन्तु मूलतो रसं प्रत्यनयोश्चेतसि बलवती काचिदास्था जागर्तिस्म,ध्वनिपदेनरसध्वनिम, औचित्यपदेन च रसौचित्यमेव वस्तुतस्तौ विवक्षतः स्मः। इत्यञ्चानन्दवर्धनक्षेमेन्द्रावपि प्रकारान्तरेण रससिद्धान्तपोषकेष्वेव परिगणनीयतामर्हतः। आनन्दवर्धनो रसस्य महिमानं तथा विस्तरेण वैविध्येन च प्रत्यपीपदत ...यथाऽनेके समालोचकास्तम नाट्यशास्त्रस्य रचना नाट्य विधानानां प्रदर्शनार्थमेवजातापरन्तुततस्पष्टता प्रसंगेऽनेके काव्यशास्त्रीया विषयःसमागतःनिर्व्याजरसवादिनमेव मन्यते। तेषामस्या मान्यतायाः समर्थनमसुकरम्। रसालंकाररीतिभ्यो विलक्षणस्य ध्वनिसिद्धान्तस्यस्थापनाया ह्यनेकेसाहित्यिका ऐतिहासिकास्च हेतवोऽभूवन, यथा चास्माभिरन्यत्र प्रतिपादितम...यदेष..ध्वनिवादः काव्ये केवलभावनातिरिक्तस्य कल्पनातत्वस्य महत्वं प्रतिष्ठापयितु सफलः प्रयासोऽभूदिति। आनन्दवर्धनेनासंलक्ष्यक्रमव्यंग याद् रसादेर्भिन्नस्य संलक्ष्यक्रमव्यंग, यस्य वस्तुध्वनेरलंकारध्वनेरप्युत्तमकाव्यत्वमुद्घोषितम, रसध्वनौ च तयोः पर्यवसानस्य तथानिवार्यत्वं नांगीकृतं यथाऽभिनवगुप्तेनांगीक्रियते, अतो रसध्वन्योरन्योन्याश्रयत्वेऽपि पार्थक्यं स्वीकार्यमेव। परमिदमसन्दिग्धम, यदानन्दवर्धनस्य रसं प्रत्याग्रहः कस्यचनापि रसवादिनोन्यूनो नासीदिति ।

काव्यस्य व्यंगयप्रधानत्वमभिदधानेनाप्यानन्दवर्धनेनानेकविधेषु व्यंग्येषु रसादिव्यंग्यस्यैव काव्यत्वं निरूपितम. तथाहि......

व्यंग्यव्यञ्जकभावेऽस्मिन विविधे सम्भवत्यपि ।
रसादिमय एतस्मिन कविः स्यादवधानवान ।इति।

वस्त्वलंकारध्वन्यात्मकः संलक्ष्यकमव्यंग्योपि रसाद्युपस्कारेण शोभातिसयं प्राप्नोतीत्यपि सोऽमन्यत्। तद्यथा.....

अनुस्वानोपमात्मापि प्रभेदो य उदाहृतः।
ध्वनेरस्य प्रबन्धेसु भासते सोऽपि केसुचित।। इति।

तस्य गुणालंकाररीतिवृत्तयः सवेर्पि काव्यपदार्था रसमाश्रयन्ते,रसव्यञ्जकतयैव ते सार्थकीभवन्ति। तथाहि...

तमर्थमवलम्बन्ते येऽगिंनं ते गुणाः स्मृताः ।
श्रंगाश्रितास्त्वलंकारा मन्तव्याः कटकादिवत् ।।इति।

अपिच—

विवक्षाततात्वेन नागित्वेन कदाचन।
काले च ग्रहणत्यागौ नातिनिर्वहणैषिता।।
निर्व्यूढावपि चांगत्वे यत्नेन प्रत्यवेक्षणम्।

रुपकादेरलंकारवर्गस्यांगत्वसाधनम्।। इति।।
विवेक्षित रुपकादेरिति शेषः। तत्परत्वेनेति रसप्रधान्येन। काले चेति च समुचिते समये। अतिनिर्वहणैषितेत्यादितोऽन्यन्तम् यादन्निर्वाहाभिलाषः। निव्यूहढावपीति क्वचित्सत्यपि तथाविते तथाविधे खल्वादितोऽन्तं यावन्निवहि। इयमेव समीक्षा रुपकादेरलंगारवर्गस्यांगत्व साधयतीत्यर्थः। ततः परं रीत्यपरपर्यायायाः संघटनाया अपि..

'गुणाश्रियत्य तिष्ठन्ती मायुर्यादीन व्यक्ति सा । रसान्'

इत्यादीना माधुर्यादिगुणाश्रयेण रसाभिव्यञ्जकत्वं प्रतिपादितम्।

काव्यगतस्य वाक्यस्य लघोर्लधीयसाप्यवेन रसव्यञ्जनमानन्दवर्धनस्यामी

'सुप्तिंगवचनसम्बन्धैस्तथा कारकशिक्तिभिः।

कृतिद्धिततसमाशैष्च द्योत्योऽलक्षस्यः मः क्वचित्।। इति।

अत्र सुमिति नाम नामविभक्तिनाम् 'तिंगति चाख्यातविभक्तिनाम्' वचनमिति एकद्विबहंवचनानाम् सम्बन्धं इति षष्ठायाः कृत्यार्थर्थकप्रत्यानात् तद्धितेत्यपत्ययाद्यर्थप्रत्ययानाम् समासेति तत्पुरुषादीनां ग्राहकाणि। तैः साक्षात् संलक्ष्यकमव्यगयद्वरेण वा रसादि रुपलोसंलक्ष्कमव्यगयः क्वचिदि द्योत्यो भवतीत्युच्यते। सर्वेष्वपि काव्यभेदेषु मुक्तकादिप्रबन्धान्तेषु रस एव जीवितत्वेन व्याप्तो भवतीति च 'कविना काव्यमुवनिबध्नता सवात्मना रसपरतन्त्रेण भवितव्यम्। नहि कावेरितिवृत्तमात्रनिर्वहणेन किञ्चित्प्रयोजनमितिहासादेव तत्सिद्धे। इति वचनेन प्रतिज्ञायते।

इत्थं ध्वन्यालोके रसस्य सार्वभौमं महत्वं निर्भ्रान्ततयोद्घोषितम् किन्तु माध्यमत्वेन सर्वत्र ध्वनिरेव प्रतिष्ठापितः। अभिनवगुप्तानन्दवर्धनमततात्पर्यपर्यालोचनेन रसस्य प्रत्यक्षाप्रत्यक्षत्वाभ्यां समर्थने भेदः स्पष्टनम् लक्ष्यते। अन्ततो गत्वा तु रसध्वन्योर्भेदस्तथा नगण्ययतामेति यथा तयोर्मध्ये विभागरेखाऽऽलेखनमपि दुष्करं भवति तथापि भेदस्तु विद्यत एव। अभिनवगुप्तो यत्र वस्त्वलंकारध्वनिसत्वं क्षणमपि न पश्यति रसपर्यवसान एव तयोः सिद्धिमवलोकयति तत्रानन्दवर्धनः संलक्ष्यक्रमव्यंगस्य पृथगस्त्विं साधयति' तस्य रसोन्मुखतामपि प्रतिपादयति। परं तथा स्पष्टैरभ्रान्तैश्च शब्दैः स ता न चर्चयति; यथाभिनवगुप्तः। अत एवानन्दवर्धनस्य रससमर्थनम् सिद्धान्ततोऽप्रतक्षं परोक्षमेव वा माननीय भवति। औचित्यसम्प्रदायप्रवर्तकाचार्यः क्षेमेन्द्रोऽपि प्रायेणानन्दवर्धन समानदृगस्ति। स रससिद्धमेव काव्यं काव्यपदव्यपदेश्यं मन्यते। आनन्दवर्धनाभिमतम्.. 'प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परां' इत्यौचित्यमेव काव्यात्मवेन स्वशब्देरनुध्वनयति..

अलंकारस्त्वलंकारा गुणा एवः गुणः सदा।

औचित्यम् रससिद्धस्य स्थिरम् काव्य जीवितम्।। इति।। क्षेमेन्द्रोऽपि

काव्यस्यास्वादनीयं तत्वं रसमेव वक्ति औचित्येन रसस्यास्वादतातिशयाः सकलसहृदयहृदयान्यभिव्याप्नोतीति च मन्यते..
'कुर्वन् सर्वाशये व्याप्तिमौचित्यरुचिरो रसः ।' इत्यादीनां।।
स्वग्रंथस्य लघीयस्येव वपुषि क्षेमेन्द्रो रसौचित्यं सविस्तरं व्यविनक्। रसस्य प्रत्ययम् आलम्बनोद्दीपनविभावानुभावव्यभिचारिप्रभृतिवणानेषु सर्वथौचित्यं निवर्हणीयम् रसानाञ्च मिथोन्वये संकरसंसृष्टयोश्चौकचत्यं कात्स्र्न्येन रक्षणीयमिति सोमन्यत्।
इत्थञ्च क्षेमेन्द्रोऽपि वस्तुतो रसमेव काव्यस्य मुख्यं तत्वमपश्यत् रस्याधारंत्वौचित्यमेवाचष्ट। मतच्चेदं सर्वथा रससिद्धान्तमनुयायति रससिद्धान्तो हि परिपाकार्थमचित्यमपरिहार्य मन्यते । औचित्याभावे हिरसौ रसाभासतामापद्यते। अनयो दृशा क्षेमेन्द्रोपि मूलतो रसवादिषु परिगणनीयो भवति। तदीयाया औचित्यकल्पनाया अप्याश्रयोऽन्तो रस एव सिद्धयति। क्षेमेन्द्रो रसोचित्ययोरन्योन्याश्रयं नाम सम्बन्धमनुपश्यति। ध्वनिकारो ध्वने रसतरेषु भेदेष्वपि रससंस्पर्शमिव क्षेमेन्द्रोऽपि नूनमौचित्यस्य रसेतरेष्वपि भेदेषु तमनिवार्यमेव निरुपयति। भाव सौन्दर्यरहितम् केवलं नैतिकं वौचित्यम् तेन काव्यपरिधौ न कल्पितम। तथापि क्षेमेन्द्रोऽप्रत्यक्षरसवादिषु गण्यते न प्रत्यक्षरसवादिषु ।
समन्यवादी श्रृंगारमेवैककं सार्वभौमम् च रसं मान्यमनोपि भोजराजः समग्रतया समन्यवादी मन्येतेति नूनमुदितम्। काव्यस्वरुपविषये तन्मतम् समन्वय वादितायाः पुष्टं स्पष्टश्च प्रमाणम्..
निर्दोषं गुणवत्काव्यमलंकारैरलंकृतम ।।
रसान्वितं कवि कुर्वन्कीर्ति प्रीतिं च विन्दति । इति।
भामहादीन पूर्ववर्तिनोऽनुसरन भोजराजोऽपि शब्दार्थसाहित्यमेव काव्यमभाणीत् तच्च साहित्यं सहभावोऽयं द्वादशधा भवति । येष्वभिधा..विवक्षा..तात्पर्यादयोऽष्टौ प्रथमे सम्बन्धास्तु वांगमयस्य सर्वाणि रुपाणि व्याप्नुवन्ति, किन्त्वन्तिमाश्चत्वारो दोषहानं गुणोपादानम, अलंकारपरिधातम रसानुसन्धानञ्चेति काव्यलक्षणानि कथ्यन्ते । काव्ये किलैतेषां चतुर्णामेव प्रातिस्विकं माहात्म्यम्, तथापि तत्र रसानुसन्धानं प्रधानमिइति निर्विवादम......
वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वांगमयम ।
सर्वासु ग्राहिणी तासु रसोक्तिं प्रतिजानते । इति ।
रसं प्रति भोजराजस्यावर्जितत्वमतिवितततद्वर्णनेनापि स्वतः सिद्धम श्रृंगारप्रकाशे यथा तेन रसस्य प्रत्येकमांग सांगोपांगमुपवर्णितम, वस्तुनोऽन्यत्र तथा न सुलभम्। श्रृंगारप्रकाशस्य षट्त्रिंशति प्रकाशेषु प्रथमैः षड्भिः प्रकाशैः शब्दार्थौ, सप्तमाष्टमाभ्यां शब्दार्थयोरभिधाया अष्टौ सम्बन्धाः, नवमें दोषहानं गुणोपादानञ्च, दशमेऽलंकारसन्निधानं, द्वादशे च नाट्यं निरुपयता तेन शिष्टा प्रकाशानां

पञ्चविंशतिः केवलाय रसाय समर्पिता। किन्त्वेतावति पक्षपातेऽप्यसौ गुणानिव रसानपि काव्यस्यालंकारान् मन्यमानो न संकुचति....

नानालंकारसंसृष्टेः प्रकाराश्च रसोक्तयः।इति।

वस्तुतो भोजराजो न केवलं समन्वयम, अपि तु संग्रहमपि पश्यति। स भरतं दण्डिनं च प्रति समानतया निष्ठावान अस्ति। वामनस्यानन्दवर्धनस्य चेत्युभयोः प्रभावेण गहनं प्रभावितोऽस्ति। अत एव व्यवहारतो रसं प्रति नितरां पक्षपाती सन्नपि सिद्धान्ते स समन्वयमेव वदति।

स्वतन्त्र.. अस्मिन्नेव युगे कुंन्तकः परम्पराभिन्नः स्वकीयया स्वतन्त्रचिन्तनया वक्रोक्तिसिद्धान्तमुद्भावयति। सामान्येन वक्रोक्तिसिद्धान्तोऽलंकारसिद्धान्तप्रतिरूपः परिणामतश्च रसवादप्रतिकूलः सिद्धान्तो मन्यते। कुन्तकोऽपि हि 'सालंकारस्य काव्यता' इति भूमिकामेवाधिशेते। किन्तु वक्रोक्तिजीविते सम्यगधीते सति कुन्तकस्य दृष्टिः किल रसविरोधिनी नास्तीति मन्तव्यमसंशयं सिद्धयति। अस्तु नाम स स्वतन्त्रो रससम्प्रदायाद भिन्नो वा। सहि काव्यात्मभूतं तत्वं वक्रोक्ति प्रतिपद्यते न रसम्। भावतत्वात्कलातत्वमधिकमाद्रियते। तथापि रसं प्रत्युत्कटस्तस्यानुरागः, येन पदे पदे स रसस्य महिमानं गायति सिद्धान्तनो ध्वनिवक्रोक्त्योरिव नास्ति। वक्रोक्तिरसयोर्मौलिकं साम्यम्, तथापि वक्रोक्तिचक्रे रसस्यापि स्थानं न्यूनं नास्ति। इदं वचनं नूनमसंगतं न स्याद् यथा रसं प्रति वक्रोक्तिध्वनिसम्प्रदाययोरुभयोरपि दृष्टिः प्रायः समानैवासीदिति। काव्यलक्षणप्रयोजनयो रसमहत्वम संभवतः प्रथमं कुन्तकः काव्यलक्षणे तत्प्रयोजनै चैव रसस्य महत्वमंगीकरोति। काव्यलक्षणो....

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि। बन्धे व्यवस्थितौ काव्यं तद्विदाहलादकारिणि। इति।

अत्र वक्रकविव्यापारशालितया सह तद्विदाहलादकारिताया अप्यपरिहार्यताविधीयते। अत्र तद्विदः काव्यमर्मज्ञाः सहृदया वा। इत्थं कुन्तकस्यापि काव्येन नियमतः सहृदयहृदयाहलादकारिणा भवितव्यमिति सम्मतम। काव्यप्रयोजनेऽपि......

चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम।

काव्यामृतरसेनान्तश्चमत्कारो वितन्यते।इति।

अत्र 'चमत्कारो वितन्यते' इत्यस्य 'आहलादः पुनः पुनः क्रियते' इति कुन्तकः स्वयमेव विवृतिं कुर्वन् आनन्दं काव्यस्य चरमं प्रयोजनं प्रति सामर्थ्य प्रकाशयति।

अत्रेदं शक्यते शंकितुम कुन्तकः किलाहलादं बहु मन्यते न रसमिति। काव्यानन्दो रसास्वादपर्यायः कथं मन्यते? भामहादिभिरलंकारवादिभिरपि प्रीतिरानन्दो वा काव्यस्य मूलप्रयोजनमुक्तम, परं तेषांमानन्दविषयिणी धारणा रसाद्भिद्यते। तथैव कुन्तकस्याप्याहलादस्तुतिर्मा भूद्रसस्तवः परमस्याः परमस्याः शंकायाः समाधानं स्वयं कुन्तकोक्तिमाश्रित्य सुकरम्। सुकुमारमार्गविवेचने कुन्तकः सहृदयं तद्विदं वा स्पष्टमेव रसादिपरमार्थज्ञस्य रसादिपरमतत्ववतर्वो पर्यार्यतया विवृणोति

'रसादिपरमार्थज्ञमनःसंवादसुन्दर' इति ।।

इतोऽतिरिक्तेष्वपि बहुपु स्थलेषु बहुपु रूपेषु च कुन्तकः सहृदयपदं रसज्ञपर्यायमेव व्याचष्टे। यथा सौभाग्यगुणलक्षणे सहृदयार्थे 'सरसात्मना,' इति शब्दं प्रायुंक्त तद् व्याख्याने च 'आर्द्रचेतसाम्' इत्युदलिखत।

'सर्वसम्पत्परिस्पन्दसम्पाद्यं सरसात्मनाम'इत्यत्र।

सरसात्मनाम आर्द्रचेतसाम। इति।

एतेन च स्पष्टतामेति कुन्तकस्य सहृदयो निश्चयेन सरसात्मा, आर्द्रचेता वा रसज्ञ एवास्ति, तस्य चाह्लादो रसास्वादान्नातिभिद्यते।

कुन्तकमतेन काव्ये रसस्थानम् कुन्तकस्य विवेचने केषुचित्प्रसंगेषु तादृश्य स्पष्टोक्तयः परिलक्ष्यन्ते याभिरिदं सिद्धयति यद् ध्वनिकारवत्कुन्तकोऽपि रसं काव्यस्य परमतत्वं मन्यते स्मेति। प्रबन्धवक्रतानिरुपणे ह्यसौ स्पष्टमुद्घोषयति यथा वक्रोक्तेः सर्वतः प्रौढमुत्कृष्टं च स्परूपं प्रएन्धवक्रतायां परिलक्ष्यते।

प्रबन्धेषु कवीन्द्राणां कीर्तिकन्देषु किं पुनः। इति ।

प्रबन्धस्य चास्य विषये तस्य द्रढीयान् विश्वासः...

निरन्तररसोद्गारगर्भसन्दर्भनिर्भराः

गिरः कवीनां जीवन्ति न कथामात्रमाश्रिताः। इति। उपर्युक्ते चोभे अप्युद्धरणे निगदेनैव व्याख्याते स्तः, ताभ्यामयं निष्कर्षः सहजमाकृष्यते यथा कुन्तकः प्रबन्धमेव काव्यस्योत्कृष्टतमं रूपं पश्यति, प्रबन्धस्य च प्राण तत्वं रसमेवानुपश्यनीति।

इत्थं च ध्वनिकाव्यवद् वक्रोक्तिकाव्यस्यापि प्राणतत्वं रस एवेति सिद्धयति।

ध्वनिसिद्धान्तवदेव वक्रोक्तिसिद्धान्तेपि रसस्य व्यंगयत्वमेव न तु वाच्यत्वम। अत्र प्रसंगे कुन्तकेनोद्भिटोक्तं रसस्य स्वशब्दवाच्यत्वमुपहसता लिखितम् 'तत्र स्वशब्दास्पदत्वं रसानामपरिगतपूर्वमस्माकम्। तदिदमुक्तं भवति यत्स्वशब्दैरभिधीयमानाः श्रुतिपथमवतरन्तश्चेतनानां चर्वणचमत्कारं कुर्वन्तीत्यनेन न्यानेन धृतपूरप्रभृतयः पदार्थाः स्वशब्दैरभिधीयमानास्तदास्वादसम्पदं सम्पादयन्तीत्येवं सर्वस्य कस्यचिदुपभोगसुखार्थिनस्तै-रुदारचरितैरयत्नेनैव तदभिधानमात्रादेव त्रैलोक्यराज्यसम्पत्सौख्यसमृद्धि प्रतिपाद्यमत इति नमस्तेभ्यः।' इति।

काव्यवस्तु विवेचनेऽपि कुन्तको रसस्य सातिशयं महत्वं निरूपयति। स काव्यस्य वर्ण्य वस्तु स्पष्टतया रसस्वरूपमिच्छति बहुधा च तस्य रसनिर्भरत्वं प्रतिपादयति....

'तदेवविधं स्वभावप्राधान्येन रसप्राधान्येन द्विप्रकार सहंजसौकुमार्यरस स्वरूपं वर्णनाविषयवस्तुनः शरीरमेवालंकार्यतामेवार्हति।' इति।

अयमस्याभिसन्धि। कुन्तको रसनिर्भताम काव्यवस्तुतः प्रमुखमंगं मन्यते। स च रसप्रधानवस्तुन्येव रसानुपवर्णयति। काव्यवस्तु चेतनाचेतनतया द्विभेदमत्र प्रथमं चेतनमेव मुख्यम्, तदर्थञ्च सुतरामपेक्षितो रसादिपरिपोष इति स निरूपयति....

मुख्यम् क्लिष्टरत्यादिपरिपोषमनोहरम्।

स्वजात्युचितहेवाकसमुल्लेखोज्ज्वलं परम्।

मुख्यं यत्प्रधानं चेतनसुरासुरादिसम्बन्धिस्वरूपं तदेवंविधं सत्कवीनां वर्णनास्पदं भवतीइति। 'अक्लिष्टः कदर्थनाविरहितः प्रत्यग्रतामनोहरो यो रत्यादिः स्थायिभावस्तस्य परिपोषः श्रृंगारप्रभृतिरसत्वापादनम्। इति च। अत्रैव कुन्तकेन विप्रलम्भश्रृंगारं करुणं चानेकयोदाहृत्य रसान्तराणामपि संकेतो दत्तः कोमलरसत्वेन विप्रलम्भकरुणौ सोदाहरणं प्रदर्शितौ, रसान्तराणां तुदाहरणान्यूह्यानीत्युक्तम् 'एवं द्वितीयमप्रधानमचेतनसिंहादिसम्बन्धि यत्स्वरूपं तदित्थं कवीनां वर्णनास्पदं सम्पद्यते।' इति।

तदित्थं काव्यवस्तुनः स्वरूपद्वयेऽपि रसप्राधान्यमिष्यते। वस्तुतो रसबन्धुरतयैव वस्तु काव्ये स्पृहणीयतामभ्येति।

वक्रोक्तिसिद्धान्तस्य मार्गविवेचनेऽपि रसस्येवमुचितं महत्वं निरूपितम्। सुकुमारविचित्रयोरुभयोरपि मार्गयो; कुन्तकः प्रकारान्तरेण रसचमत्कारमुद्गलिखति। सुकुमारोहि मार्गः स्वरूपेणैव रसादिपरमार्थज्ञमनः संवादसुन्दरो भवति। रसादिपरमत्ववेतृसहृदयहृदयानुरूपतया शोभन इत्यर्थः विचित्रो नाम मार्गश्च कमनीयवैचित्र्यपरिपोषेण सह सरसाकूतो भवति। कुन्तककृत्या स्वविवृत्या 'रसनिर्भराभिप्रायोऽपीत्यर्थः। अपरतश्च तृतीयः मध्यमो नाम मार्गोऽपि तयोर्मिश्रस्वरूपतया स्वतः एव रसपुष्टो भवतीति।

तदित्थं च त्रिष्वपि मार्गेषु रससञ्चारो दुष्परिहरः।

ततः काव्यभेदे, काव्यवस्तुनि, काव्यमार्गे चेति त्रितयेऽपि निरूप्यमाणेकुन्तको रसमहिमानं प्रत्यतिष्ठितमिति सिद्धम्। रसवदलंकारप्रतिषेधो रसस्य चालंकार्यता। अन्ते रस दलंकारप्रतिषेधेन रसस्य चालंकार्यत्वसाधनेनेदमतितरां विशदीभवति यत्कुन्तको रसं प्रति कया कियत्या मात्रयाऽऽग्रहिलोऽभूत्। वस्तुतः कुन्तकात्पूर्ववर्तिभिरप्यलंकारवादिभिर्न तिरस्कृतो रसः, तथापि तैरलंकारतयैवायं स्वीकृतः । रसध्वनिवादिनस्तेषामिदं मतमेव रसतिरस्कारकारणं मन्यन्ते। इत्थं हि रसस्यात्मभूतस्यापि भूषणमात्रत्वं निरूप्यते। अनयैव दृशा ते रसवदलंकारं निराकृत्य रसस्यालंकार्यतां प्रत्यतिष्ठिपन। कुन्तको रसविषये भामहृदण्डूयुद्भटपरम्परां परिहृत्य रसध्वनि वादिनोऽन्वसरत्। तथाहि.....

अलंकारो न रसवत्परस्याप्रतिभासनात्।

स्वरूपादतिरिक्तस्य शब्दार्थासंगतेरपि।। इति।

रसवतोऽनलंकारतायां हेतुद्वयम् स्वस्वरूपातिरिक्तस्यान्यस्य कस्यचिदप्यलंकार्यतया प्रतीतेरभाव इत्येकः। अलंकार्यस्य रसस्य चालंकारत्वे तत्र शब्दार्थयोरन्वयो न संगच्छते इत्यपरः। ततो रसोऽलंकार्य एव, नालंकार इति स्पष्टम्।

अत्रेदं पृच्छयते अलंकारर्यत्वे प्रतिपादितेऽपि रसस्य माहात्म्यविशेषो न प्रतितिष्ठति रसो हि तेन शरीरमात्रं सम्पद्यते न त्वात्मेति, तत्र तक्तव्यं अतएव कुन्तकेनैस

संसयो निराकृतः। 'रसवतोऽलंकार इति न। यस्य कस्यचित्काव्यत्वं रसवत्वमेव।' इति।

अमुमेव प्रसंगमनुसरता कुन्तकेन प्रकारान्तरेणापि रसे पक्षपातः प्रकाशितः। तेन रसवदलंकारस्य पारम्पर्यकमागतं स्वरुपमपोह्य स्वाभिमतं पारमार्थिकं तत्त्वरूपं निरूपितम् 'रसवत्वस्य विधानेन, सहृदयहृदयाह्लादकारित्वेन च योऽलंकारो रससादृश्यं भजते स रसवदितिव्यपदेस्यतामर्हति।' उपर्युक्तेन लक्षणेनेदं स्पस्टम्। अपि च कुन्तकः स्ववृत्तावपि इत्थं रसतत्वविधानेनायमलंकारः सर्वालंकारप्राणः काव्यस्याद्वितीयसारसर्वस्व सम्पद्यते। इति। 'इतः स्तुतिः स्यात्खलु का रसस्य'? रसवक्तोक्तयोः सम्बन्धः अथात्र प्रच्छयते, एकतोऽलंकाररूपस्या वक्तोक्तेरेव काव्यजीवितत्वे रसस्य काव्यपरमतत्वतायां कथमनयोः सामञ्जस्यं स्यादिति। को नाम परमार्थतो रसवक्रोक्त्योः सम्बन्ध इति यावत्। तत्रेदं सुवचम। गृहीते खलु कुन्तकस्य मूलधारणासूत्रेनैतद्दुःसमाधेयं स्यात्। कुन्तको वक्रोक्ति काव्यजीवितं मन्यते इति निस्चप्रचम्। वक्रोक्तेरेवार्थोऽन्यत्रास्मदुक्तरीत्या नोक्तिचमत्कारमात्रम, अपितु कविकौसलम्, काव्यकला वेत्यवगन्तव्यम्। ततः काव्यं वक्रोक्तिः कला वेति कुन्तकमतम। एतत्कलाकृते च कविः शब्दार्थयोरनेका विभूतीरुपयुङ्क्ते, तत्रार्थविभूतिसु महार्ध्यतमा रसविभूतिः अत एव रसो वक्रोक्तिस्वरूपिण्याः काव्यकलायाः परमं तत्वम्। काव्यस्य प्राणचेतनाऽस्ति वक्रता, वक्रतायाः समृद्धेः प्रमुखाधारश्च्व वर्तते रससम्पदित्यवदातम्।

ध्वनिपरवर्तिनि काले ध्वनेरेव प्रामुख्यमभवत् मम्मटेन महिमभट्टादीनां ध्वनिविरोधिनस्तर्कान् प्रामाणिक्या शैल्या निरस्य ध्वनिसिद्धान्तः सर्वात्मना द्रढीयस्यां भूमिकायां प्रतिष्ठापितः। स एव चैकया विधया संस्कृतकाव्यसास्त्रस्य सर्वसम्मतः सिद्धान्तः संवृत्तः। अतो ध्वनिपरवर्तिनः कालस्य प्रमुखतमा प्रवृत्तिः ध्वनिवाद एव वा रसध्वनिवाद एव वाऽस्थात्। एतत्पोसकेसु तदनुयायिसु वा मम्मटहेमचन्द्रविद्याधरपण्डितराजगन्नाथादयो विशेसादुल्लेखनीया भवन्ति। एतेभ्यो भिन्ना अलंकारवादिनोऽलंकारानुरागिणो वा रूप्यकजयदवाप्पयदीक्षितादयोऽपि विस्तरेण ध्वनिं विवेचयन्तस्तन्मान्यतां स्वीचक्रुः। रसवादस्यापि प्रभावः प्रसारोवा न क्षीणः। ईदृसा ह्यनेक आचार्या अस्मिन्नुगे प्राभवन् ये ध्वनिमाध्यमेन युक्तमपि सुद्ध रसवादं प्रत्यपीपदन्। ते यथा....अग्निपुराणस्य प्रणेता सम्पादकोवा, रामचन्द्रगुणचन्द्रौ, विश्वनाथः, सारदातनयः, सिंगभूपालः, भानुदत्तः, रूपगोस्वामिप्रभृतयश्च्व। इदंयुगीना चतुर्थी प्रवृत्तिरस्ति कविशिक्षा। यस्याः प्रचारः पूवपिक्षयेदानीं वृद्धिमुपगतः। एतेसां समीक्षकारणाँ दृस्टिः काव्यस्य मूलभूतानां सिद्धान्तानां विचारविस्लेषणाभ्यां परिभ्रस्य काव्यरचनायां सहकारिण्यांः सामग्रयाः संकलनेऽतिकेन्द्रिताऽभूत्। वस्तुतः कञ्चिदेकं सार्वभौमं सिद्धान्तं सम्प्रदायं प्रति वाऽस्मिन्युगे निस्ठाया अभावोऽभवत्। अमरचन्द्रस्य काव्यकल्पलतावृत्तिः, देवेस्वरस्य काव्यकल्पलता च वर्गस्यास्य प्रसिद्धे कृती स्तः।

ध्वनिवादिन अस्य युगस्य ध्वनिवादिनामपि प्रायो रसं प्रति सैव दृष्टिरासीद्या पूर्वमानन्दवर्धनस्य बभूव। एषामपि हृदये रसं प्रत्यबाधमाकर्षणमभूत्, रसमेते काव्यस्य सकलप्रयोजनमौलिभूतं प्रयोजनम्, रसध्वनिञ्च शब्दभेदेनोत्तमं काव्यंमन्यन्ते । रसस्य विवेचनं तु तावदेतेऽसंलक्ष्यक्रमव्यंग यतयैवाकुर्वन, न तु स्वतन्त्रकाव्यांगतया। तस्त्वलंकारध्वनिमप्येते तावदुत्तमं काव्यमचकथन। व्यंग्याप्राधान्येऽपि च सरसं गद्यपद्यादि गुणीभूतव्यंगूयं मध्यमं काव्यं च भवति। इत्थमेतैः समेतैः रसस्य महत्वं मन्यमानं ध्वन्याश्रितत्वं स्थापितम्। रसे व्यंग्यान्तरे च प्रतियोगितायां व्यंग्यार्थप्रत्येव पक्षपातः प्रकाशितः। रसं प्रयोजनत्वेनानिवार्य काव्यतत्वं मत्वापि ध्वनिरेवात्मतत्वतयाऽंगीकृतः। मम्मटो वर्गस्यास्य किलाग्रणी रस्ति। ग्रन्थस्य मंगलपद्ये काव्यप्रयोजनप्रकरणे च स रसं प्रति कञ्चिदुत्कटमनुरागं प्रकटयत्—

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधति भारती कवेजर्यति।।

कवेः सा काव्यात्मिका सरस्वती जयति। यस्या निर्मितिर्नियतिनियन्त्रणात्सर्वथा विमुक्त, केवलानन्दयुक्ता, स्वातिरिक्ता नवैश्च नवभिश्च रसैसर्रिताऽत्यन्तं मनोहारिणी च भवति। इत्यर्थः।

इत्थमेव काव्यप्रयोजनान्वाख्याने 'सद्यः परनिर्वृतये इति पद्यप्रयुक्तं स्वपदं विवृण्वानेन तेन 'सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भतं विगलित-वेद्यान्तरमानन्दम्' इत्युक्तम्? मम्मटारसादेश्चालंकार्यतां स्पष्टमुद्घृतं—

रसभाव-तदाभास-भावशान्त्यादिक्रमः।
भिन्नो रसाद्यलंकारादलंकार्सतया स्थितः।। इति

इत्थमेव शब्दार्थयोः काव्यतायाः प्रयोजकं स रसव्यञ्जनक्षमत्वमेवामन्यन्, नकेवलं व्यञ्जनक्षमत्वम् ।

'पदैकदेशरचनावर्णेष्वपि रसादयः इति'।

पदवाक्यप्रबन्धानां रसादिव्यञ्जकत्वमुदाहृत्यानया कारिकया पदैकदेशानां प्रकृतिप्रत्ययोपसर्गरूपाणाम् रचनानां रीतिवृत्तीनाम, वर्णानामपि रसव्यञ्जकत्वं निरुपितम्। काव्यप्रकाशस्यास्मिंश्चतुर्थ उल्लासे मम्मटेनानन्दवर्धनाचार्यप्रतिपादितदिशा वर्णादिप्रबन्धान्तानां सर्वेषामपि शब्दार्थस्वरूपाणां रसव्यञ्जकत्वं सविस्तरं मार्मिकतया च व्याख्यातम् वस्तुतः काव्यप्रकाशस्यायमुल्लासः रससन्दर्भस्य प्रामाणिक्यै व्याख्यायै विद्वद्भिः सदाप्रसन्नोभवत्। अत्राहि मम्मटेनातिसूक्ष्मगम्भीरतया शैल्या रसमणि निरुपितानि। गुणालंकारदोषाणां प्रसंगेष्वपि रसस्य महत्वमतिशयेन विशदतां नीतम्—

ये रसस्यागिंनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः।।

इति गुणनिरूपेणे रसस्यागिंत्वं स्फुटमेवोदितम्। तथैव—

उपकुर्वन्ति तं सन्तं येऽंगद्वारेण जातुचित्।

हारादिवदलंकारास्तेऽनुप्रासोपमादयः।।
इत्यत्रालंकारलक्षणेऽप्यागिंनो रसस्य शब्दार्थरूपांगद्वारेणोपकारिणामनुप्रासोपमादिनां शरीरद्वारेणात्मनो हारादिनामिवालंकारत्वमुपपादितम्। तथैव दोषदर्शनेऽपि—
'मुख्यार्थाहतिर्दोषो रसश्च मुख्यः।'

इत्यादौ मुख्यार्थापकर्षकस्य दोषत्वम् रसस्य च मुख्यार्थत्वं प्रतिपादितम्। वाच्यवाचकयोश्च तदुपायत्वम्। अतो मुख्यतया रसापकर्षकतत्वम्, रसाश्रयतया च शब्दार्थापकर्षकमपि तत्वं दोषपदव्यपदेश्यं भवतीति निरूपितम्।
इत्यमी सर्वेऽपि सन्दर्भाः मम्मटस्य रसेऽनुरागं द्योतयन्ति। तथापि मम्मटसिद्धान्तचक्रे रसस्य स्थानं ध्वनेरनन्तरं समापतति। सकलप्रयोजनमौलिभूतोऽपि रसो ध्वनिमाश्रितो भवति, तथैव च मात्रया स ध्वन्यपेक्षया गौणोऽपि भवति। स्पष्टञ्चात्र, प्रमाणम्
'यदनेनासंलक्ष्यक्रमव्यंग्यस्य ध्वनेरन्तर्गततया रसो निरूपितः। रसभावतदाभास भावशान्त्यादिक्रमः।। इति।

अपि च रसस्य गौणत्वमपि मम्मटस्य सम्मतम्। यत्र हि रसो मुख्यस्तत्रायमलंकार्यः। परं यत्र गुणीभूतोऽपरांगतां वा गतस्तत्रासावलंकारोऽपि भवति
'अन्यत्र तु प्रधाने वाक्यार्थे, यत्रांगभूतो रसादिस्तत्र गुणीभूतव्यग्यं ये रसवत्प्रेय उर्जस्वि समाहितादयोऽलंकाराः इति।'

रसवादिनो रसस्येयं स्थितिर्नेष्टा। तस्यरसः कदाचिदपि गुणीभावं नोपैति रसाद्भिन्नेऽपि मुख्ये वाक्यार्थे कवित्वं रसमात्राश्रितं भवति। अतः कवित्वदृष्ट्या तथाकथितोऽभिप्रेतोऽर्थ एव गुणीभावमेष्यति। अयमभिप्रायः यदि कस्यचिद् गद्यस्यपद्यस्य वा रसरूपोऽर्थो मुख्यो न भवति, अर्थान्तरं च तत्र मुख्यतामेति, तत्रापि कवित्वदृष्ट्या रसरूपोऽर्थः एव मुख्यः स्यात् अर्थान्तरं च गौणम्। रसो हि न जातु गुणीभवति, स कदाचिदप्यंगतामलंकारतां वा न प्रतिपत्तुमर्हतीत्।
व्यंग्यार्थस्य प्राथमिकतायां गुणीभूतव्यंग्योदाहरणेषु क्वचित्क्वाचिद् रसोऽनावश्यकरूपेण गौणतां गच्छति। अत्रेदं विवेचनं निदर्शनम्........
अतादृशि गुणीभूतव्यंग्यं व्यंग्येतु मध्यमम्।
अतादृशि वाच्यादनतिशायिनि।।
यथा...
ग्रामतरूणं तरूण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया।।

अत्र वञ्जुललतागृहे दत्तसंकेता नागतेति व्यंग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात् इति।
वस्तुतो विवेचनमिदं ध्वनिसिद्धान्तस्य दौर्बल्यमभिव्यनक्ति, नूनं सरसं रमणीयञ्च पद्यमिदम्। रमणीहृदयगतः कोमलोऽनुतापो रमणीयोऽनुभावः, मुहुर्मलिनीभवत्या मुखच्छायया सहजसुन्दरतयाऽभिव्यज्यते। परं मम्मटो ध्वनिवादितया

रमणीयमपीदमनुभावचित्रं मध्यमकाव्यकोटौ निक्षिपति, यतोऽत्र व्यंग्योऽर्थो 'वञ्जुललतागृहे दत्तसंकेतापि नागतेतिरूपो गौणतां गतः। ध्वनिकारस्य मर्मस्पर्शिनी दृष्टिर्ध्वनिवादस्येदं दौर्बल्यं पर्यचिनोति। अत एव तेनोक्तम्....

'ध्वनिष्यन्दरुपो द्वितीयोर्थोऽपि महाकविविषयोऽतिरमणीयो लक्षणीयाः सहृदयैः'। इति।।

अस्मिन् सन्दर्भे मम्मटस्य काव्यलक्षणे रसाभावोऽपि सांकेतितुं शक्यते। 'यमाक्षेपः स्वतो मान्यः' रसस्य सहृदयत्वे हि शब्दार्थयोः तस्य स्थितिर्म्मटेन मान्या च सम्भवति। अत एव च तेन सर्वथा व्यंग्यः सहृदयनिष्ठश्च रसः स्वकाव्यलक्षणेऽपि व्यंग्यत्वेन निरुपितो न वाच्यता। तर्कान्तरमपीदमत्रोपतिष्ठते यथा रसोऽत्र गुण एवान्तर्भवति। तथापीदं लक्षणं तथ्यमिदमवश्यं प्रकाशयति यन्मम्मटस्य रसं प्रति तावान अधीरो वाऽऽग्रहो नासीत् यावान् विश्वानथादीनामभूत। यथा चास्माभिरत्र साधितम् यन्मम्मटस्येदं काव्यलक्षणं केवलमनुवदति माष्यात्मना वा विवृणोति इदं मध्यमुपेक्षितम। इत्थं चायं सहजो निष्कर्षः यद् रससिद्धान्ते मम्टस्य ध्वनिवादं प्रत परा निष्ठाऽऽसीदिति।

हेमचन्द्रविद्याधरयोरुमयोरपि मम्मटात् कश्चिद्तर्कोः लक्ष्यते। हेमचन्द्रेण हि रसं प्रति स्वकीये काव्यानुसाने प्रायः सैव दृष्टिः स्पष्टीकृता या मम्मटेन दर्शिताभूत।

शरीरस्थानीयोः शब्दार्थयोरुत्कर्ष साधयन्तः काव्यस्यात्मस्थानीयस्य रसस्योत्कर्ष साधयन्ति, एते। इत्थमेव दोषोऽपि रसस्यापकर्षकतया काव्यस्यापकर्षका भवन्तीति'दोषास्तस्यापकर्षकाः। श्रुतिदुष्टापुष्टत्वादयः काणत्वखञ्जनत्वादयः इव शब्दार्थद्वारेण देहद्वारेणेव, व्यभिचारादिमावादेः स्वशब्दवाच्यत्वादयो मूर्खत्वादयः इवपाक्षात्काव्यस्यात्मभूतं रसमपकर्षयन्तः काव्यस्यपकर्षकाः इत्युच्यन्ते। इत्थं विश्वनाथस्य रस एव काव्यस्यात्मेत्यभिमतम्, इदमेव चैकं प्रधानतत्वम। कदाचिद् राजशेखरात् संकेतं गृहीत्वा स काव्ये पुरूषारोपेण काव्यतत्वानां मिथः सम्बन्धं सापेक्षां स्थितिञ्च स्पष्टीकृतवान....

काव्यस्य शब्दार्थोशरीरं रसादिश्चात्मा, गुणाः शौर्यादिवदित्यादि।'

अत्र रूपके ध्वनिः क्वचिदपि नोल्लिखितः। यद्यपि वक्रोक्तिरपि कविराजेन स्वीकृता. 'वक्रोक्तेरलंकाररूपत्वात्' काव्यात्मत्वं न युज्यते। तथापि साहित्यदर्पणस्य चतुर्थे परिच्छेदे विश्वनाथेन ध्वनिः सविस्तरेण विवेचितः, ध्वनिवादिवच्च ध्वनेरुत्तमकाव्यताप्यभिमता..

'वाच्यातिशायिनि व्यंग्ये ध्वनिस्तत्काव्यमुत्तमम्।इति।

वाच्यादतिचमत्कारिणि व्यंग्ये ध्वनिरिति व्यपदिश्यते तथा ध्वनिकाव्यमुत्तमं काव्यमिति कथ्यते। अपि चानेन रसोऽप्यसंलक्ष्यक्रमव्यंग्यान्तर्गततया निरुपितः...'तत्राद्यो रसमावादि'रिति। अर्थाद् ध्वनिभेदेषु प्रथमोऽसंलक्ष्यक्रमव्यंग्यो रसादिरूपो भवतीति। एतैर्वचनैः शंकोदेति यदिह रसध्वन्योस्तारतम्ये विश्वनाथस्य किं दर्शनमिति? किञ्च

पण्डितबलदेवोपाध्यायप्रभृतिभिर्विश्वनाथो ध्वनिवादितया परिचायितो न रसवादितया। वस्तुस्थितस्तु विशदा, विश्वनाथो, रसमेव काव्यस्यात्मानमाहेति। तथापि रसस्याभिव्यक्तेरनिवार्यतया, वाच्यतासहत्वाभावेन सततव्यंग्यतया ध्वनेरपि काव्ये किमप्यपरिहार्य महत्वमस्तीति स मन्यते। अर्थात तस्य रसपदं रसध्वनिपरमेव, रसध्वनिसद्भावे च ध्वनिकाव्यस्य स्थितमेवोत्तमकाव्यत्वम्। किन्तु रसध्वनिपरमेव तन्न वस्तुध्वनिपरम्। अतः एव तस्य यत्तु ध्वनिकारेणोक्तम् "काव्यस्यात्मा ध्वनिः' इति, तत्किं वस्त्वलंकाररसादिलक्षणस्त्रिरूपो ध्वनिः काव्यस्यात्मा उत,रसादिरूपमात्रो वा? नाद्यः प्रहेलिकादावतिव्याप्तेः। द्वितीयश्चेदमिति ब्रूमः। ननु यदि रसादिरूपमात्रो ध्वनिः काव्यस्यात्मा। तदा——

अत्ता एत्ती णिमज्जइ एत्ती अहं दिअसश्रं पलोएहि ।
मा पहिअ रत्तिअन्धिअ सेज्जाए मह णिमज्जहिसि।।

इत्यादौ वस्तुमात्रस्य व्यंग्यत्वे अपिकाव्यव्यवहारः इति चेन्न, अत्रापि रसभावत्वमेवेति ब्रूमः। अन्यथा देवदत्तो ग्रामं याति' इति वाक्ये तद्भृत्यस्य तदनुसरणरूपव्यंग्यावगतेरपि काव्यत्वं स्यात्। अस्त्विति चेन्न। रसवत् एव काव्यत्वांगीकारात्।

काव्यस्यात्मा ध्वनिरिति यत् ध्वनिकारेणोक्तम्। तत्रैतत्पृच्छ्यते.किं वस्त्वलंकाररसादिरूपाणां सर्वेषामपि ध्वनीनां काव्यात्मत्वम्? उत केवलस्य रसादिरूपस्यैवध्वनेः? इति। अनयोः प्रथमः पक्षो न श्रेयान्, प्रहेलिकादौ हि वस्तुध्वनिस्थलेऽपिकाव्यलक्षणस्यातिव्याप्त्यापत्तेः।अलक्ष्ये लक्षणगमनाद् अतिव्याप्तिर्नाम लक्षणादेषो आपद्यते। अपरः पक्षो मन्यते चेद्वयमपि तत्र सम्मताः, रसादिध्वनिर्ह्यस्माकमपि काव्यात्मत्वेनाभितः न च केवलं रसादिध्वनेः काव्यात्मत्वे...

'श्वश्रूरत्र निमज्जति अत्राहं दिवसकं एव प्रलोकय ।
मा पथिक रात्र्यन्ध शय्यायां मम निमंक्ष्यसि।

इत्यत्र पद्ये काव्यत्वं न स्यात्।

'अत्र स्थले मम श्वश्रूर्निद्रामग्नतया अविज्ञातवृत्ता स्वपिति अत्र चाहं स्वपिमि इति दिवसे एव विलोक्य। हे रात्र्यन्धक (तिमिररोगिन्) पथिक, रात्रौ मम शय्यायां मा निमंक्ष्यसि।'

इति स्वयं दूती वक्ति। एवंविधेषु स्थलेषु वस्तुमात्रव्यंग्येषु कथं काव्यत्वं व्यपदिश्येतेति वाच्यम्, अत्रापि रसवत्तयैव वयं काव्यत्वं मन्यामहे। अत्र ह्यागन्तुके परपुरुषे स्वयंदूत्या रतिः प्रतीयते, याऽनौचित्याच्छृंगाररसाभासतां प्रतिपद्यते।

इति विश्वनाथमतं सर्वथा निर्भ्रमम्। यथा रस इति पदं रसध्वनिपरम्, तथैव काव्यगतं ध्वनिरिति पदमपि रसध्वनिमात्रपरम्। काव्ये प्राधान्यं रसस्यैव। स एव काव्यात्मा, ध्वनिस्त्वध्यात्मभूतस्य रसस्यापरिहार्य माध्यमम्। अत एव विश्वनाथस्य रसेन सह ध्वनिरपि सर्वथा ग्राह्यः एव। इदमेव तदीयदर्शने रसध्वन्योस्तारतम्यम्,

इत्थञ्च विश्वनाथ आनन्दवर्धनादभिनवगुप्तस्य नेदीयान्भानुदत्तस्य (त्रयोदशचतुर्दशशताब्दीसम्भवस्य) रसतरंगिणी रसमञ्जरीचेति ग्रन्थद्वयमपि विशुद्धरसशास्त्रम्। रसतरंगिण्यां रसस्यावयवाः, भेदप्रभेदाश्च, रसमञ्जर्याञ्च तस्यालम्बनभूतयोर्नायिकानायकयोर्नानारूपाणि सविस्तरमुपवर्णितानि।
अनयोः सकलं कलेवरं रसमात्रयार्पितम् रसातिरिक्तानामन्येषां काव्यतत्वानामलंकाररीतिगुणध्वनीनां प्रतिपादनं गौणतया रसानुगततया वा नानयोरुत्क्रान्तम्। रसतरंगिण्या मुख्यं लक्ष्यं...
भारत्याः शास्त्रकान्तारश्रान्तायाः शैत्यकारिणी ।
क्रियते भानुना भूरिरसा रसतरंगिणी।।'इत्युक्तं ।
'भानुकविप्रणीतया भूरिरसमय्या रसतरंगिण्या शास्त्रगहनकान्तारभ्रमणश्रान्तायाः क्लान्तायाः भारत्या शान्तिः शैत्यं वा लप्स्यते।' इति तदाशयः।
एवमेव रसमञ्जरीप्रणयनप्रयोजनमपि विद्वद्वृन्दमन्नोमिलिन्दानां रसपानमेवोदाहृतम् । तथाहि...
विद्वत्कुलमनोभृंगरसव्यासंगहेतवे ।
एषां प्रकाश्यते श्रीमद्भानुना रसमञ्जरी।। इति तदुक्तिः।
अनयोर्ग्रन्थयोरयं प्रणेता त्वसंलक्ष्यक्रमव्यंग्याद्यावर्तेऽनिपत्य'हेतोः पूर्ववृत्तित्वनियमात्' रसकारणस्य भावस्यैव विवेचनं कृतवान्। भानुदत्तोरसमैहिकामुष्मिकजीवनयोः सारं मन्यते। ऐहिकस्य हि जीवनस्याधारः प्रवृत्तिः, तस्याश्च परिपाको मायारसे भवति, यस्य स्थायिभावोऽस्ति मिथ्याज्ञानवासना। मिथ्याज्ञानवासनापरिपाकात्मकोऽयं मायारसः एव सकललौकिकरसैकमूलम् । आमुष्मिकजीवनस्य त्वाधारोभगवद्विषया रतिर्या नानारसमयी भवति। अत एव.एतेषु प्रथमवर्गीयतया विविधासु भाषासु काव्यप्रकाशस्य क्वचित्क्वचिच्चसाहित्यदर्पणस्य त्रुटितस्फुटिता अनुवादाः भाषान्तराणि वा प्राप्यन्ते । संङ्ख्या त्वेषामतिविरला। मध्यकाले ह्यल्पीय एवाभूदनुवादकार्यम्। हिन्द्यां केनचिद् धनीरामनामकेनानतिविश्रुतेन कविना काव्यप्रकाशस्यापूर्णोऽनुवादः कृतः, अधुना त्वयं प्रायोनोपलभ्यते । अन्यासु भाषासु यथा तेलगुकन्नडप्रभृतिषु शोभनतरं कार्यमक्रियत तत्र त्रिचतुराणि नामान्युल्लिख्यन्ते, तान्यपि दुर्लभप्रायाण्येवा। द्वितीयवर्गीयतया तावत् कन्नडभाषायाः कविराजमार्गः (नवमशताब्द्या नृपतुंगेन विरचितः) काव्यावलोकनम् (द्वादशशताब्द्यां नागवर्मणा प्रणीतम्) रसविवेकः श्रृंगाररत्नाकरो वा (द्वादशशताब्दीसन्निधाने कविकामेन कृतः) रसरत्नाकरः (त्रिंशदधिकपञ्चदशशताब्द्यां साल्वेन सन्दृब्धः) नवरसालंकारः (षोडशशताब्द्यासन्ने तिम्मेन निबद्धः इत्येवमादयः। मलयालमभाषायां लीलातिलकं यत्र लक्षणादीनि संस्कृतमयानि सन्ति (त्रयोदशचतुर्दशशताब्द्योर्मध्येऽज्ञानेत केनचिद्रचितः) माहाराष्ट्र्यां नागेशविट्ठलाभ्यां विरचिता रसमञ्जरी, गंगाधरशास्त्रीकृतो रसकल्लोलः तेलुगुभाषायां अनन्तामात्यकृतं रसाभरणम्, विन्नकोटपेद्दयकविकृतः काव्यालंकारचूडामणिः,

वेणुतुर्लवड्डिकविकृतं रसालवालमित्यादयः। वस्तुतोऽस्मिन क्षेत्रेऽधिकतमं कार्य हिन्दीभाषायामेव सम्पन्नम्, यत्र भक्तिकालेऽपि भाषान्तरापेक्षयाऽधिकतमंकार्य सञ्जातम्, तदनन्तरन्तु विक्रमस्य सप्तदश्याः शताब्द्या आरभ्य एकोनविंशी शताब्दीं यावत् कृत्स्नेऽपि रीतिकाले, तदनन्तरमपि च सार्धद्विशताब्दीं यावत् काव्य शास्त्रधाराऽबाधेनागाधेन च वेगेन प्रावहत। तैः कविभिः काव्यप्रकाशसाहित्यदर्पणरसमञ्जरीचन्द्रालोककुवलयानन्दादीनाश्रित्य संस्कृतकाव्यशास्त्रस्य माननीयैः सिद्धान्तै नियमैः काव्यांगैर्हिन्द्यां सविस्तरं काव्यांगानि विवेचितानि। एषां कवीनां सतामाचार्याणां निर्दिष्टा वर्गाः द्रष्टुं शक्यन्ते। अत्र सर्वांगनिरूपकाचार्येषु केशवदासचिन्तामणि कुलपतिदेवदास सोमनाथ.प्रतापसाहिप्रभृतयः प्रमुखाः आसन्। सर्वरसनिरूपकाचार्येषु रसलीन.रामसिंह.पद्माकर.वेनी.प्रवीण.ग्वालादयो महान्तमभियोगमकुर्वत। श्रृंगारनिरूपकपरम्परायां पुनर्मतिरामसुखदेवमुख्यानांविशिष्टंमहत्वमुवर्तते। नायिकाभेदनिरूपकेषुभक्तिकालिकाः कृपारामरहीमकेशवादयस्तथा रीतिकालिकाः अनेके रसिकाचार्याः नामाग्रहं ग्रहीतुं शक्यन्ते। भक्तिपरकरसशास्त्रपरिकल्पनाधारोऽशतया भारतीयभाषाणामेव काव्यमस्ति यद्यप्यस्याः प्रवृत्तेर्मूलग्रन्थावुज्जवलनीलमणिभक्तिरसामृतसिन्धूस्तः संस्कृतमयौं। शाहजहानसमकालिकः पण्डितराजो जगन्नाथः। अस्मिन्युगे विनिर्मितस्य विभिन्नभारतीयभाषासाहित्यस्य प्रत्यक्षाप्रत्यक्षतयाऽध्ययनेनाहमवधारयामि यत्साहित्यसृष्टिर्यत्र बहुधाऽऽधुनिकीषु भाषास्वभावात् तत्र सिद्धान्तनिरूपणार्थ देशस्य प्रत्येकस्मिन् भागे प्रायः संस्कृतमेवाश्रयते। यथा भूयोभिर्वैष्णवकविभिः काव्यानि तावद् देश्यभाषासुकाव्यशास्त्रं सम्यक् विकासोवसरं नालभत्। तथापि भाषाकविभिः प्रकारान्तरेण काव्यशास्त्रविकासे महानभियोगो दर्शितः इति नास्त्यत्र संशयः। मध्ययुगे माधुर्यभावाप्लुता या भक्तिकाव्यरसधारा भारतीयभाषामाध्यमेन प्रभाविता, तस्याः परिणामेन भारतीयकाव्यशास्त्रे ध्वन्यपेक्षया रससिद्धान्तस्यैकच्छत्रं राज्यं प्रतिष्ठापितम्। वस्तुतश्च सत्यपि रसमहिमानं संस्कृतकाव्यशास्त्रस्य प्रतिनिधिभूतः सिद्धान्तो ध्वनिनिष्ठ एवाभूत्। भारतीयवाङ्मये रसध्वनेरावरणमपाकृत्य शुद्धस्य रसस्य प्रतिष्ठानं तावदेभिर्भक्तकविभिरेव विहितम्। चतुर्दशपञ्चदशशताब्दीभ्यां सप्तदशाष्टादशशताब्दौ यावदुत्तरदक्षिणयोः पूर्वपश्चिमयोश्च सर्वत्र मधुरभक्तिधारा तथोद्दामं प्रावहत् यथा हृदयरस॰ काव्ययोरन्तरास्थितं व्यञ्जनायाः सूक्ष्ममावरणं विच्छिद्य विभिद्य च प्रवहत्। अत एव रससिद्धान्तस्य पूर्णतया प्रतिष्ठानं भाषासाहित्य एव न्यायतो माननीयं संस्कृतसाहित्ये। अतः परमेते कवयो रसक्षेत्रं व्यस्तारयन्नपि, येन भक्तिवात्सल्ययोः रसत्वमनिवार्यतया स्वीकार्यमभूत्। तत्र संस्कृताचार्यैः श्रृंगारो रसराजतया सिद्धान्तितोऽभवत्, तमप्यमी कवयो भक्तिचर्चितस्य श्रृंगारस्याबाधया सृष्ट्याऽसत्यापयन्। तत्प्रयत्नेन परिणामेन भारतीयकाव्यशास्त्रे

श्रृंगारवादः केनचिन्नूतनेन रूपेण प्रत्यतिष्ठत्। एवमाधुनिकभारतीयभाषेतिवृत्तस्य मध्यकालो रससिद्धान्तस्य परमसमृद्धेः प्रबलविकासस्य च युगमासीत्।

## ई-विभिन्नसम्प्रदायेषुरसस्यव्यापकत्वम्---

भारतीयकाव्यशास्त्रे रससिद्धान्तः प्राचीनतमः काव्यसिद्धान्तः। अलंकाररीतिवक्रोक्ति औचित्य सिद्धान्तानां विकासोऽस्मादनन्तरमस्यैव सन्दर्भे चाभवत । काव्यस्यान्तरंगुवहिरंगयोः... आत्मदेहयोराधारेण यदि वर्गो विभज्येताम्, तदालंकाररीतिव कोक्तयो देहवादिनां वस्तुवादिनां वा सम्प्रदायाः प्रोक्तः स्युः, ध्वन्यौचित्ये चात्मवादिनाम। एषामात्मवादिनां सम्प्रदायानां रससिद्धान्तेन सार्क तु प्रत्यक्षो सम्बन्धोस्त्येव ध्वन्यौचित्ययोरपि कल्पना प्रकारान्तरेण रसमाधृत्यैव व्यधीयत औचित्यसिद्धान्तप्रवर्तकेन स्पष्टमुपक्रमं एवाभिहितम्.....औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितं। इति। वस्तुतोऽस्यौचित्यभवनस्य वाच्याच्चारुतरस्य व्यंगयस्य नाम ध्वनिः,चारुतायाश्च निकषोऽस्ति रसात्मकता। इत्थं ध्वनेः शुद्धं रूपं रसध्वनिरेवास्ति। अतएव रसध्वनिसिद्धान्तौ प्रायेणैकाकारावेव जातौ, सामान्यतश्च केनाप्याचार्येण तयोर्भेदो न कृतः। अद्यापि तयोः पृथक्करणं न सुकरम। भेदो वस्तुतो बलाबलमाश्रयति। ध्वनिसिद्धान्तो भावव्यञ्जनायाम् आधुनिकशब्दावल्या कल्पनात्मिका-यामभिव्यक्तौ बलमाधत्ते, रससिद्धान्तश्च भावतत्वे, यद्यपि ध्वनिवादी भावस्यात्मनां न कुरुते रसवादी च व्यञ्जनायाः। इत्थं काव्ये ध्वनिरसयोः सहयोगः कल्पनाभावतत्वयोः सहयोगः, उभयोश्चानयोः प्रतियोगस्तयोः प्रतियोगोऽस्ति यथा केवलभावनया केवलकल्पनया वा कवित्वसिद्धिर्नसम्भवति, तथा केवलभावेन, केवलध्वनिना वा काव्यास्यास्तित्वं न सम्भवति उभयोः पूर्णेन सहयोगेनैव काव्यस्य सृष्टिर्भवति। परमुभयोः प्रतियोगे समुपस्थिते, उभयोः सापेक्षिके महत्वे कल्पनाभावयोः प्रतियोगम्, सापेक्षिकं महत्वं वाधृत्यैव निर्णेष्यामः। नचायं निर्णयो दुष्करः। आधुनिक आलोचनाशास्त्रे चेदं निर्विवादतया सिद्धम्, यत्कल्पनाभावनयोर्भावनायाः महत्वमेवाति शेते, काव्यस्य हि संवेद्यो भावोनाम, कल्पनातु तत्सम्प्रेषणस्य माध्यमम्।यद्यपि चेदं माध्यममनिवार्यम्, तथापि तत्संवेद्यसमकक्षं तु न सम्भवति। अस्य युगस्यसर्वातिरेकेण पाश्चात्यालोचकाः आई0 ए0 रिचईसः मनोविज्ञानस्यानुभूतिरूपनेव मन्यते। इदमेवास्ति यत्रतावदभिप्रेताऽनुभूतिः शुद्धभावपर्यायो नास्ति, तत्र कल्पनाविचारतत्वयोरपि योगोऽस्ति, तथाप्यनुभूतौ भावस्य प्रधानता.. सन्दिग्धता नास्ति, स्वयमनुभूतिशब्दः एव भावप्राध्यान्ये प्रमाणम्। वस्तुवादिनः आचार्याःकाव्यस्य वाह्य सौन्दर्ये बलमादधते, भावस्योपेक्षां तेऽपि न कुर्वन्ति किन्तु तेषां दृष्टौ स गौण एव। तन्मतेन कवित्वं नाम कथनचारुत्वम, कथ्यं. यत्र भावविचारावुभावप्यन्तर्भूतौ स्तः कथनस्य चारुतायाः

एवांगमुपकरणं वास्ति। इत्थञ्चैतत्सिद्धान्तानुसारेण रसभाव विभूतिर्न कवित्वस्य सारतत्वं अपितु प्रकरणमात्रम्। यथा. अलंकारसिद्धान्तानुसारेणालंकाराः एव काव्यशोभाकारणानि, काव्यस्य सौन्दर्यमलंकाराश्रितमित्यर्थः, कवित्वं खल्वलंकारे निहितम्। अलंकाराः शब्दार्थधर्माः न साधारणधर्माः, न ते तादृशयोः शब्दार्थयोर्धर्माः, ये सामान्यतः प्रयुज्यन्ते विशेषधर्माः, ये शब्दार्थसौन्दर्य सृष्ट्वा तस्य काव्यस्वरूपं प्रददति। अलंकारोऽपि द्विविधः... सामान्यो विशेषश्च । सामान्यस्यान्तर्गततया काव्यस्य प्रसिद्धानां वर्ण्यविषयाणां, तद्वर्णनशैलीमहत्वदृष्ट्या विवेचनमक्रियत। अस्मिन्वर्गे चेदृशां वस्तूनां विषयाणां वा वर्णनं क्रियते, येषां समावेशेन काव्ये चमत्कारस्य सौन्दर्यस्य वा सृष्टिर्भवति।

# 1-अलंकारः

अत्र च शब्दार्थो काव्यम् इत्यनुसारेण शब्दार्थविव काव्यपदार्थः। तत्रापि न वस्तुमुख्यता अपितु वर्णनशैलीमुख्यतया भवति। अतएव दण्डिना 'सामान्यालंकारेषु वर्ण्यविषयैः सह कथाशिल्पांगानि... सन्धिसन्ध्यंगादीनि साग्रहं गृहीतानि। सामान्यालंकाराणां क्षेत्रं वस्तुतः प्रबन्धकाव्यमस्ति। विशेषालंकारवर्गेऽनुप्रासयमकादयः शब्दालंकाराः उपमारूपकादश्चार्थालंकाराः समाविशन्ति। एषामलंकाराणां क्षेत्रं प्रायेणोक्तिं वाक्यं वा यावदेव सीमितम् अतएवास्माभिरूच्यते यच्छब्दालंकाराणां प्राप्तिः क्वचित्क्वचित्समग्रे सर्गे, सम्पूर्णे वा प्रबन्धेऽपि दृश्यते यथा राघवपाण्डवीयादौ। तथापि विशेषालंकारा वाक्यस्योक्तेरेव वा चमत्काराः अतएव कुन्तकेन नार्थालंकाराः वाक्यवक्रतायां विवेचिताः। इदमिह तात्पर्य यत्सामान्यालंकाराणां सम्बन्धः प्रबन्धेन कथाकाव्येन वा नियतः विशेषालंकाराणां च मुक्तकेन सूक्तिकाव्येन वा। एतेषु क्रमाद् विशेषलंकाराः एव यथावन्मान्यतां गता, रसालंकारयोर्द्वन्द्वे चालंकारार्थतया शब्दार्थालंकारो एव गृहीताः। आधुनिक्यां शब्दावल्यां स्वकीये व्यापकेऽर्थेऽलंकारशब्दः काव्यशिल्पपर्यायः सीमिते त्वर्थे उक्तिचमत्कारस्याभिव्यञ्जनाशिल्पस्य वेति । अलंकारसम्प्रदायस्य जन्मैवेदंमत्वाऽभवत्.. रसस्य नाट्येन सम्बन्धः... यत्र विभावानुभावादीनां प्रत्यक्षोपस्थापनेनरससिद्धिः सहजतया सम्भवति, इममेव तर्कमधिकृत्य शब्दार्थात्मकेन काव्येन तस्य साक्षात्सम्बन्धो न स्वीकृतः, नापि स्वीकर्तुं शक्यः। काव्यस्य सारः ..शब्दार्थसौन्दर्य.. अलंकार एव सम्भवति प्रबन्धस्य व्यापके क्षेत्रेऽलंकारपदेन वर्णनशैली सौन्दर्यमभिप्रेयते, मुक्तकेषु सूक्तिषु वा उक्तिचमत्कारः। अत्रोभयत्रापि सामान्यालंकारकल्पना रसाद् न भवति यतस्तेषान्तु रसस्य विभावानुभावपक्षेण प्रत्यक्ष एव सम्बन्धः। काव्यस्य वर्ण्यविषयाः

एव हि विभावानुभावौ। अलंकारवादिनः प्राचीनाचार्यो इदं सम्बन्धसूत्रम ना गृहणन, अत एव ते काव्ये रसमुपेक्षन्तेत्यनुमीयते। विशेषालंकारेषु चमत्कारः प्रायोवाक्ये सीमितो भवति। अलंकारवादिनस्तमिमं शब्दार्थगतं चमत्कारमेव कवित्वस्यधारं मन्यन्ते न तद्व्यञ्जितं भावम्। ते मन्यन्ते यच्छन्दोविशेषस्य सौन्दर्य, तत्प्रमेवाश्रितं कवित्वन, नत्वेतैरूपकरणैरभिव्यक्तेः वा भावविशेषम् । ते शब्दार्थगतेन चमतकारैष्व साक्षात् काव्यानन्दप्रतीतिं मन्यन्ते, ते भावं विजहन्ति।शब्दार्थगतचमत्कारेण सहृदयहृदये प्रथमं काश्चिद्भावसंस्कारो जागर्ति ततश्च तन्माध्यमेनानन्दप्रतीतिर्जायते इति ते न मन्यन्ते, सम्भवतो वा न जानन्ति ते खल्विदमपि न स्वीकुर्वन्ति यथा शब्दार्थचमत्कृतिस्तन्मते कवित्वपर्यायतया स्वीक्रियते तदाधारस्तन्निमित्ता भावनैवास्तीति काविप्रतिमां.. सर्जनात्मिकां कल्पनाशक्तिं तु ते साग्रहं स्वीकुर्वन्ति परं तत्प्रेरकाणां भावसंस्काराणां कृतेऽलंकारवादिनां कृते नास्ति किञ्चिन्महत्वम्.. प्राथमिकं महत्वं तुनास्त्येव।इतः प्रतीपं तन्मते रससामग्री भावसामग्री वांलकार सृष्टिसाधनतयाऽवश्यमुत्पुजेता विभावानुभावव्यभिचारिभावादीनां वर्णनेनापि कवित्वसृष्टिः सम्भवति सारमिमे विभावदयः प्रत्यक्षशक्तिः कवित्वं न सृजन्ति, एतेऽपि शब्दार्थावुपस्कुर्वन्तस्तत्र चमत्कारमुत्पादयन्ति रसोऽप्यलंकारांगमेवास्तीत्यर्थः। अलंकारसम्प्रदायस्य स्थापनायाः प्राग् रससिद्धान्तस्य विस्तृतं सर्वांगीणं च विवेचनं सम्पन्नमासीत्, रसमयं काव्यञ्च प्राचुर्येणुपलभ्यतेस्म अतस्तैस्यैकान्तात्यन्ततस्तूपेक्षा न सम्भवति तस्य, अतोऽलंकारवादिभिर्भावशब्दो सर्वथा रूढे स्थूले वार्थे गृहीतः। तयोः स्वसिद्धान्तेऽन्तर्भावाय रसवत्प्रेयसमाहितालंकाराः उदभाव्यन्त, रसः चैव् स्वकीयया भावाविभावादिसम्पदा सहालंकार राजसमायाः सामान्यसामन्तवत्सम्मिलितोऽभूत। तथापि रसं प्रति सर्वेषांमलंकारवादिनां दृष्टिरेकैव नासीत्.. भामहोद्भटौ यत्र नितान्तमुदासीनावास्ताम् तत्र दण्डिरुद्रटावलं स्निग्धावभूताम्। परवर्तिनोऽलंकारवादिनस्तु तन्महत्वं वर्णितम्। जयदेवसदृशस्योग्रालंकारवादिनः काव्यसिद्धान्तावद्रसध्वन्योः प्रभावेणौताः प्रोताःसन्ति। अयमत्र निष्कर्षो यदारम्भे भ्रांन्तिरस्थानात् यद्रसस्यनाद्र्येनैव सम्बन्धोऽस्तीति तावदलंकारसम्प्रदायः ।परमितोग्रे, भावसौन्दर्यासम्पृक्त शब्दार्थचमत्कृतिं...पारिभाषिकशब्दावल्या. चित्रकाव्यं यदालंकारिकः लक्ष्यन्ति किं तत्सहृदयमनः प्रीतये पर्याप्तं स्यात् अहं मन्ये यदत्रैव रसालंकारतारतम्ये निर्णयिते आधुनिक आलोचनाशास्त्रेऽलंकारस्याप्रस्तुतविधानस्य विम्बयोजनया वा महत्वं कटककेयूरसमतुल्यम, यद्यथासमयमुन्मुच्यापि रिक्तं स्यात् तदीयं महत्वं शारीरिकाद्रूपरागादप्यधिकमस्ति, तथापि तस्य प्राणत्वमात्मत्वं वा प्रायो नांगीकृतम। अलंकारे कवित्वपर्यायतयाऽंगीकृते नूनमिदमपि माननीयं स्याद्यत्कला चमत्कारसृष्टिमात्रम् नानुभूतेः सम्प्रेषणाभिव्यक्तिः। कलायाः बहुमायानां भव्यानामुद्देश्यानां स्थाने केवलया कुतूहलोद्बुद्धयापि काव्यकृतित्वं सम्पद्येत्।

## (2) रीतिः...

रीतिसिद्धान्तोऽप्यलंकारसम्प्रदायवद् रसानुकूलो नास्ति । वामनमते रीतिरात्मा काव्यस्य, रसश्च रीतेराधारभूतेषु विंशतिगुणेषु एवमस्यार्थगुणंस्वकान्तेर्मूलतत्वम् । इत्थं रीतिसिद्धान्ते रसोरीतेरेकं पोषकं तत्वम् । रसदीप्तिर्हि रीतिशोभां पुष्णाति इदमेव तस्याः सार्थक्यम् । रसस्य प्रत्यक्षतो गुणैः सहास्ति सम्बन्धः, गुणाश्चैव शब्दार्थरूपस्य काव्यस्य नित्यधर्माः, अतो रसस्य सम्बन्धोऽपि काव्यस्य नित्यधर्मेण सह स्थाप्यते किन्तुतदवस्थितर्गुणमात्रे वर्तते, अतस्तन्मूल्यमपि सीमितमेव ततो रससिद्धान्ते रसः काव्यस्यात्मा, पदसंघटनारीतिश्चावयवसंस्थानविशेषवदस्ति। वर्णानां शब्दानां च विन्यासेन लब्धस्वरूपा रीतिर्गुणमाश्रिता, गुणाश्च रसधर्माः, अतो गुणसम्बन्धेन रीतिरपि रसेन सम्बद्धयते। अलंकारवच्च रीतिरपि रसोपकारिका, यथोक्ति चमत्कारो रसव्यञ्जनायां.. सहायको भवति तथा सुन्दरपदरचनापि स्यात्। रीतिर्हि शब्दार्थाश्रितो रचनाचमत्कारः या माधुर्यौजःप्रसादगुणैश्चित्तं द्रावयन्ती, दीपयन्ती, विशदीकुर्वन्ती च रसदशां यावद्गमयितुं.साधनतया सहकरोति। अतो रससिद्धान्ते रीतेरस्थानं नियतम् सत्तां यथोचितमुपयुङ्क्ते। यावत्सापेक्षिकस्य महत्वस्य प्रश्नस्तावदुभयोः स्थितिः सर्वथा स्पष्टा। रीतिशब्दार्थ एव साधयति यदियं विधिमात्रम् न तु तत्वमिति। विधेरप्यस्ति निजं महत्वं, अनेकेषु च सन्दर्भेषु काव्यसन्दर्भेऽपि..विधिः क्रियाया मूलाधारो भवति। तथापि स तत्वेन समकक्षस्ततोऽतिशयितो वा न समीवर्ति। रमणीयेन शब्दविन्यासेनार्थे रमणीयतामायाति रमणीयार्थसंस्पर्शेन वा शब्देनाप्यर्थः संस्क्रियते, एकस्य शब्दस्य स्थाने समानार्थकस्य शब्दान्तरस्य प्रयोगेण शब्दानुक्रमे वा परिवर्तनेनार्थश्चैव मत्क्रियते इति। परं वस्तुतस्तया न भवति, प्रतीतिमात्रं तु। नचामीष्टमावाभिव्यक्तये मूलशब्दो मूलकनो वा नासीदुपयुक्तः तेनार्थरमणीयता वाधिताऽऽसीत्। उपर्युक्ते शब्दे क्रमे च व्यवस्थितेऽमीष्टार्थाभिव्यक्तिर्विनिवायासं सञ्जातेति तत्र विज्ञेयम्। अभीष्ट एवार्थो रमणीयोऽर्थः। शब्दास्तेषां क्रमो वाऽऽत्मेति रमणीयो न । वस्तुतः शब्दः प्रतीकमात्रम् तस्य तथोक्तायाः रमणीयतायाः आधारस्तु रमणीयोऽर्थः एव, यस्यासौ प्रतीकः, अर्थस्य च रमणीयतायाः आधारो भवति भावः। रमते श्रोतृचित्तं यस्मिंस्तदेव रमणीयं भवति। श्रोतश्चित्तवृत्तेश्च संवादश्चित्तवृत्या भावेनैव वा संभवति, इत्यमर्थरमणीयता भावरञ्जितैव भवति। स एवार्थो रमणीयः योऽस्माकं बोधवृत्या सह चित्तवृत्तिमपि प्रभावयति, अतश्चैव स एव शब्दो रमणीयः, येनार्थबोधेन सह भावोद्बोधोऽपि स्यात्। शब्दानां क्रमे विन्यासे वापीदमेव सत्यम्। अतः शब्दार्थयोः तस्य च चारुत्वे निदानं वस्तुतो भाव एवेति नास्त्यत्र

विवादावसरः। रीतिसिद्धान्तेनायं निमित्तनैमित्तिकक्रमो विपर्यासितः, स एव तस्य पतने हेतुरभवत्।

## 3-ध्वनिः

रस सम्प्रदायस्य प्रमुखतमाचार्योऽभिनवगुप्तः। तस्य हि क्रान्तदर्शिनी प्रतिभारससिद्धान्तैतिह्ये क्रान्तिमसृजत्। काव्यशास्त्रेएतयोःद्वौग्रन्थौ-ध्वन्यालोकलोचनम अभिनवभारती चेति।ध्वन्यालोकलोचनेनासावानन्दवर्धनस्य ध्वनिसिद्धान्तं व्यशदयत्। अभिनवभारतत्याः सह भरतस्य नाट्याशास्त्रेन सह सम्बन्धः। अभिनवगुप्तस्य विषये रसवादो वाऽऽसीदयं रसध्वनिवादी वेति । तत्रेदं वक्तव्यम्-नास्ति वस्तुतो रसेरसध्वनौ च कश्चन मूलतो भेदः । तथापि रससम्प्रदायाद् ध्वनिसम्प्रदायस्य भेदो व्यावहारिकदृष्ट्या निरूपितं वर्तते। । आधुनिकस्याऽऽलोचनांशास्त्रस्य शब्दैरयमनुभूतिकल्पनयोः प्राधान्येन कृतः । उभौ चेमौ सम्प्रदायावनुभूतिकल्पनयोरनिवार्यामन्योन्याश्रयिता मन्यते, बलाबल भेदस्तूभयत्र स्पष्टः । बलाबलनिकषकषणे नाभिनवगुप्तस्यरसंप्रत्याग्रहो विशदीभवत् । तथहि –
तेन रस एव वस्तुत आत्मा वस्तत्वलंकारध्वनो तु सर्वथा रसं प्रति पर्यवस्येत इति वाच्यादुकृष्टौ तावेत्यामियाधेण ध्वनिः काव्यात्मेतिसामान्यकन्योक्तम्।
इति तेन ध्वन्यालोकलोचनेऽ अन्यच्च..
, योक्तम्.. धमार्थकाममोक्षेषु वैचण्यं कलाषु च,
करोति कीर्तिं प्रीतिं च साधुकाव्यनिशेवणम्।।. इति।
तथापि तत्र प्रीतिरेव प्रधान्यम्। अन्यथा प्रभुसम्मितेभ्यो वेदादिभ्यो मित्रसम्मितेभ्यश्चेतिहासादिभ्यो व्युत्पत्तिहेतुभ्यः कोऽस्य काव्यरूपस्य व्युत्पत्तिहेतोर्जायासम्मितत्वलक्षणे विशेष इति प्रधान्येनानन्द एवोक्तः । चतुर्वर्गव्युत्पत्तेरपि चानन्द एव पार्यन्तिकं मुख्यं फलम्।
,प्रधान्यादिति रसपर्यवसानादित्यर्थः । तावत्मान्त्रविश्रान्तवपि चान्य शास्त्रवैलक्षण्यकारित्वेन वस्त्वलंकारध्वनेरपि जीवितमौचित्यादुक्तमिति भावः। इत्यापि तेनैवोट्टकितं। एतैरुद्धरणैश्चैतत्सिध्यति यद् ध्वनिकारो रसं प्रति पक्षपातं प्रदर्शयन्नपि वस्त्वलंकारध्वनि मुक्ताभावेन गृहणाति तत्रमिनवगुप्तो रसं प्रति दृढाग्रहग्रहिलः संस्तौ सायासं स्वीकरोति। ग्रंथकारभास्यकारोकयं दृष्टिभेदोऽन्तपर्यन्तं

स्थितः वस्तुतोऽभिनवस्य दर्शनं शैवाद्वैतम् यत् परमतत्वस्यानन्दाद्वैतमयी स्थिमाथित्रितम्। शैवाद्वैताश्रयभूतमिदं किलानन्दतत्वद्वैततयाऽखण्डमनादि च विद्यते तस्याभिव्यक्तिमात्रं भवति नोत्पत्तिः। इत्यर्थः। शैवाद्वैताभिव्यक्तिवादः सत्वानन्दवादसाधकसिद्धान्तत्वेन साग्रहमंगीक्रियते। अभिनवगुप्तेनास्मादेव हेतो रससिद्धान्तसाधकत्वेन ध्वनिसिद्धान्तः समनोयोगादृतः स नूनं मूलतो रसवादी ध्वनिरपि तस्य रसविषयिण्या धारणायां पुष्ट्येऽनिवार्यतया स्वीकार्यः । उभयोरप्यनयोर्ध्वनिरससिद्धान्तयोराचार्यस्याभिनवगुप्तस्य निष्ठायाःइदमेवस्पष्टतम् प्रयोजकम्।

स्वकीयेषु दर्शनग्रंथेषु प्रत्यभिज्ञादर्शनप्रकाशेऽभिनवगुप्तेन रसतत्त्वमद्भुततया व्याख्यातम्। अत्राभिनवभारतीयोरपि मूलकारिकाव्याख्यानेन साकं रससिद्धान्तस्य प्रायः सर्वेपि प्रसंगा स्वातन्त्र्येण गाम्भीर्येण च विमृष्टाः यस्य प्रभावोधापि भारतीये रसशास्त्रे व्यापकतयाऽक्षुण्णतया च विराजते। रसशास्त्रेऽभिनवेन भूयस्यः कान्तिकर्ष स्थापनाःकृताः या अद्यापि यथापूर्व मान्यतां वहन्ति।

रसरुपस्य तन्निष्पत्तिश्च सन्दर्भेऽभिनवेन पूर्ववर्तिनं उत्पत्तिवादानुकृतिवादभुक्तिवादप्रभृतयः सिद्धान्ताः बलवत्युदिताः। अभिव्यक्तिवादश्च द्रढीयस्यां दार्शनिक्यां भूमिकायां प्रतिष्ठापितः। रसस्यानुकार्यानुकर्तृगतत्वेप्रतिविध्य सहृदयगतत्वं तेन समादृतम्। इत्यञ्च रसस्य वस्तुनिष्ठत्वं निरस्य विशुद्धो व्यक्तिनिष्ठो वात्मनिष्ठस्तदास्वादः प्रतिपादयति। भट्टनायकस्य भुक्तिवादे भासते वेति निशितम् अभिनवेनाभिव्यक्तिवादे रसस्याखण्डाद्वैतमयी सत्ता दृढतया स्थिरीकृताः।..

सांख्यमतप्रभावितम् रसस्य सुखदुखात्मकम् स्वरुपम् यद्यपि भट्टनायकेनैव निरास्यात् तथाप्यभिनवगुन्तः शिवाद्वैत्प्रकाशे निर्भ्रान्ततया तन्निराकृत्य रसस्यैकान्तानन्दमयी आह्लादमयी वा स्थितिः प्रतिपादयत।

अभिनवगुप्तेन भरतस्य गुरुभट्टतोतस्य च संकेतेन रसस्य कविगतत्वमपि विशदं व्याख्यातम्। भारतीये काव्यशास्त्रे रसस्य कविगतत्वमियत्वा प्रामाणिकतयान्यत्रोल्लिखतं नोपलभ्यते ।

"कविगतसाधरणीभूतसंविन्मूलश्च काव्यपुरश्चरो नटव्यापारः। सैव च संवित्पर्यभारतो रसः । सामाजिकस्य तत्प्रतीत्या वशीकृतस्य पाश्चादपोद्धारबुद्धया विभावादिप्रतितिरिति। तदेवं मूलबीजस्यानीवः कविगतो रसः। " इति।

अतः परं कविगतस्य सामाजिक गतस्य च रसस्य मिथं सम्बन्धं व्याचक्षाणेनाऽऽचार्येणोदलेखि ..

कविर्हि सामाजिकतुल्य एव । तत एवोक्तं श्रृंगारी चेत्कविः काव्ये इत्याद्यानन्दवर्धनाचार्येण । ततो वृक्षस्थानीयं काव्यंम, तत्र पुष्पादिस्थानीयोऽभिनयादिर्नटव्यापार, फलस्थानीयः सामाजिकरसास्वादः । तेन रसमयमेव विश्वम ।

भरतस्त्वोषधिव्यञ्जनादिदृष्टान्तेन रसपरिपाकं व्याचचक्षे । अभिनवेन शस्त्रीया दिशा प्रतिपादितम्।

लोल्लटप्रतिपादितं रसानन्त्यं निषिध्याभिनवेन नवैव रसाः स्थिरीकृताः, शान्तश्च महारसपदे प्रतिष्ठापितः। शान्त प्रति भूयांस्तदाग्रहः, येनासौ मुहुर्मुहुर्नाट्यशास्त्रस्य तत्संस्करणं समुद्धरति , यत्र भरतेन शान्तस्यास्तित्वमंगीकृतम । अभिनवभारत्यां शान्तेन सह श्रृंगारोऽपि महता ग्रन्थेन निरूपितः । इत्थं रसं प्रति तदाग्रहो निश्चीयते । विचीयते च तदीयस्य रसविवेचनस्य व्यापकत्वं गम्भीरत्वं बलवत्त्वञ्च । परिचीयते च भारतीयरसशास्त्रेऽभिनवगुप्तस्यान्यतमं स्थानम।

राजशेखरः

(कालक्रमेणाभिनवगुप्तात्पूर्ववर्ती) प्राधान्येन कविशिक्षां प्राणैषीत्, परन्तदीयविचारस्य परिधिर्व्यापकतरः, तदीया दृष्टिश्चाधुनिकीतरा । तदीय रसविवेचनं संक्षिप्तम, परं तन्महत्वावलोकने नितरामनाविला तद्दृष्टिः....

शब्दार्थो ते शरीरम् ........ रस आत्मा;

इत्यादिरुपा। अत्र सरस्वती स्वपुत्र काव्यपुरुष स्तौति। अर्थव्याप्तिनिरूपणप्रसंगे चायं भट्टलोल्लटमुदाहरन पुनरपि रसमहत्वं न्यरूपयत.....

अत्र रसपदं वस्तुसोन्दर्य भिन्ने भावसौन्दर्यरूपे विसुद्धे शास्त्रीये रसपदार्थ प्रयुक्तम । भारतीयं हि काव्यं प्रकृतिकवेर्भेदिन देदीप्ते' तथापि भारतीये रसशास्त्रे प्रकृतिरालम्बनविभावपदं नाध्यगच्छत । रसपरिपाकाय प्रतिक्रियाप्यपेक्ष्यते, अलंकारं किल तस्मै क्रियामात्रम । एतमेव तर्कमधिशय्यास्य प्रतिक्रयाशक्तिवञ्चिता प्रकृतिर्नालमभूद रसपरिपाकाय । राजशेखरः काव्यमीमांसायां नवमेऽध्याये भारतीयरस शास्त्रेस्येदमेव महनोयं तथ्यं प्रत्यपादयत् । सोऽमन्यत् । प्राकृतिकानि रमणीयानि दृश्यानि वर्ण्यमानानि मनो हरन्ति,परं तेषु सरस्त्वं मानवीयाभीरेव भावनाभिर्भियते । सरिदद्रिसागरपुरेतुरंगरथादिवर्णनेषु कथं मानवीयभावनासंस्पर्शजा सरसतोदेतीतीदं तेनोपयुक्तैरूदाहरणैर्गम्भीरं विवेचितम । तत्र नदीवर्णनरसवत्ता यथा –

एतां विलोकय तनूदरि ताम्रपर्णी –

मम्भोनिधो विवृतशुक्तिपुटोद्धृ तानि ।

यस्याः पयांसि परिणाहिषु हारमूर्त्यावामभ्रुवा परिणमन्ति पयोधरेषु । इति ।

नूनमिदं नदीवर्णनं मानवसौन्दर्यलालसयोः सम्पर्शेन रसवत्तामुपगतम् ।

राजशेखरो जैनाचार्यस्य पाल्यकीर्ते स्वजायाया अवन्तिसौन्दर्याश्च मतमुद्धरन्नत्र प्रसंगे रसस्यकान्तात्मपरकस्थितिं नाम कामपि महनीयां स्थापनामतिष्ठिपत ।
"यद्वा तद्वास्तु वस्तुरूपम, रसवत्वं तु कविप्रकृतिमाश्रितम" इति पाल्यकीर्तिः ।
"नास्ति किमपि वस्तु नियतस्वरूपम, प्रत्येकं हि परिवर्तते वस्तु" इत्यवन्तिसुन्दरी ।
इत्थमिदं रसस्य कविगतत्वं भारतीये काव्यशास्त्रे नूनमूरीकृतपूर्वम,पश्चातु सहृदयगतत्वेन प्रसरता कविगतत्वमाच्छादितम । राजशेखरस्तेषु स्वतन्त्रचेतस्वाचार्येषु प्रतिष्ठतः, येरिदं विशदतया व्याख्यातम ।

अस्मिन्युगे रससिद्धान्तस्य साक्षात्समर्थकं ग्रन्थान्तरं दशरूपकं नामापि विश्रुतम। इदं भरतनाट्यशास्त्रमाघृतम । अतो गन्थकारस्य घनञ्जयस्य तत्समसामयिकस्य वृत्तिकारस्य धनिकस्य च रसे निष्ठावत्वं स्वाभाविकम । दशरूपकस्य चतुर्थे प्रकाशे रसस्वरूपम, काव्यरसयोः सम्बन्ध, रसविरोधपरिहारौ, शान्तो रसस्तस्य च नाट्येऽसिद्धत्वम, विविधानां रसानामवयवा भेदाश्चसावहितं स्पष्टं च निरूपिताः । धनञ्जयधनिकौ भावविभावादिनिरूपकयोः शब्दार्थयोः काव्यत्वम, रसेन सह चास्य भावकभाव्यत्वं न तु व्यञ्जकव्यंगयत्वं नाम सम्बन्धं प्रतिपादितवन्तौ । आनन्दवर्धनाभिनवगुप्तपरम्पराविलक्षणो भट्टलोल्लटशंकुकभट्टनायकानां प्रभावस्तयोर्लक्ष्यते – 'काव्यशब्दानां चान्वयव्यतिरेकाभ्यां निरतिशयसुखास्वादव्यतिरेकेणा प्रतिपाद्यप्रतिपादकयोः प्रयोजनान्तरापलब्धेः स्वानन्दोद्भुतिरेव' कार्यत्वेनावधर्यकम' इति ।

इत्थं काव्ये शब्दप्रयोगो विभावादि- स्थायिभाव-रसानां प्रतिपत्तये भवति तत्राति विभावादयः स्थायिभावस्य रसस्य च प्रतिपादकाः, रसभावौ च तैषां प्रतिपाद्यौ । काव्य तत्छन्द-विभावादि-स्थायिभाव-रसनामन्योन्यसम्बन्धपर्यालोचनया काव्यात्मकस्य वाक्यस्यैकमेव प्रसयोजनं नः प्रतिभति-सह्रदयान्जरानन्दोद्भूतिरिति । इदमन्तरा काव्यस्य प्रयोजनान्तरं नोपलभ्यन्ते, तस्मादानन्दोद्भूतिरेवैकं काव्यस्य कार्यमिति ।
धनञ्जसधनिकयोः काव्यचमत्कारो न रसपदार्थः, अपि तु विभवादिस्थायि-भवाभ्यामानन्दोद्भूतिरेव । अतएव–
"तदुद्भूं तेनिमित्तत्वञ्य विभावादिसंसृष्टस्य स्थायिनः एवावगम्यत" इत्युक्तम् ।

## (4) वक्रोक्तिः...

वक्रोक्तिकारस्य दृष्टिः सुतरामुदाराऽऽसीत्। तेन काव्यलक्षण प्रयोजनान्तर्गततया रसमहत्वमपि मुक्तकण्ठेन प्रतिष्ठापितम्। लक्षणे कुन्तकेन तत्रकविव्यापारेण सह तद्विदाह्लादकारितायाः अप्यनिवार्यत्वं निरूपितम्। प्रयोजनविषये च स्पष्टा तदुद्घोषणा....

चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते।।

काव्यामृतरसेन सहृदयानां अन्तश्चतुर्वर्गफलास्वादमप्यतिक्रम्य चमत्कारो वितन्यते इति तदर्थः। तद्विदर्थश्चैव कुन्तकस्य शब्दावल्यां न काव्यमर्मज्ञमात्रम्, अपितु सरसात्मार्द्रचेतोरसादिपरमार्थज्ञानादिपर्यायः, रसमर्मज्ञः इति यावत्। तथैव काव्यभेदे, काव्यवस्तुनि, काव्यमार्गे चापि रसस्य स्थानमतिप्रमुखं मतम्। प्रबन्धकाव्यस्य सर्वश्रेष्ठं रूपं तस्याधारतत्वञ्च रस एव नतु कथा। तथाहि...

निरन्तररसोद्गारगर्भसन्दर्भनिर्भराः।
गिरःकवीनां जीवन्ति न कथामात्रमाश्रिताः।।इति

वक्रोक्तिसिद्धान्तान्तर्गतस्य काव्यस्य परमतत्वं रस एव। काव्यस्तु कुन्तकमते द्विविधम् स्वभावप्रधानम, रसप्रधानञ्च। उभयञ्चेदं रसस्वरूपमिति।

तदेवंविधं स्वभावप्राधान्येन रसप्राधान्येन द्विप्रकारं सहजसौकुमार्यसरसंस्वरूपं वर्णनाविषयवस्तुनः शरीरमेवालंकार्य' इति। अस्य वर्ण्यवस्तुनश्चेतनाचेतनतयाऽन्यावपि द्वौ भेदौ भवतः। तत्र चेतनं मुख्यम, तस्य च रसादिपरिपोषोऽनिवार्यः, अचेतनस्य वर्णनमपि काव्यांगम, परमचेतनानां प्राकृतिकानां वा दृश्यानां पदार्थानां चेदं वर्णनं स्वकीयेन रसोद्दीपनसामर्थ्येनैव काव्यं भवति। अयमाशयो यद्वर्ण्यवस्तु वस्तुतः स्वरसनिर्भरेणैव काव्ये ग्राह्यं भवति, काव्यमार्गविवेचनेऽप्यसन्दिग्धा रसप्रधानता, सुकुमारे, विचित्रे चेत्युभयविधेऽपि मार्गे रसचमत्कारेण भवितव्यमेव।सुकुमारमार्गः खलु 'रसादिपरमार्थज्ञमनःसंवादसुन्दरः' इत्युक्तः, अतः सरसरहस्यसहृदयहृदयानुरूपतयासुन्दरोभवति, विचित्रमार्गश्चैव कमनीयवैचित्र्यपरिपोषितः सरसाकूतश्चैव भवति, कुन्तकोक्त्या रसनिर्भराभिप्रायश्च भवति। ततस्तृतीयो मार्गः... मध्यममार्गोऽप्यनयोर्मिश्ररूपतया रसपुष्टो भवति। इत्थं त्रिष्वपि मार्गेषु रसाभिषेकोऽपरिहार्यः।अत्र रसवदलंकारप्रतिषेधेन रसस्य चालंकार्यतप्रतिष्ठापनेन कुन्तको रसं प्रति स्वपक्षपातमतर्क्यतयाभिव्यनक्तिस्म। अलंकारवादिनो ये न प्रहरणेन रससिद्धान्तेन युध्यमाना अभवन, कुन्तकेन स एव निष्प्रभावीकृतः। तदनुसारेण रसस्यालंकारपदव्यपदेशः सर्वथानुचितः।किन्तु.....

रसेन वर्तते तुल्यं रसतत्वविधानतः।
योऽलंकारः स रसवत्तद्विदाह्लादनिर्मितिः।
यथा स रसवन्नाम सर्वालंकारजीवितम्।
काव्यैकसारतां याति.......................।।

इति चोक्त्वा कुन्तको रससिद्धान्तस्य केन्द्रमेव प्राप्तः अलंकारस्यतदेव सत्यं स्वरूपं यद्रसप्रभावेण चमत्कृतं स्यात् भावनारागेषु च रञ्जितं स्यात्। अलंकारेऽपि रसाभिषेकेणैव कवित्वमुद्भाव्यते न केवला शब्दार्थकेलिः कवित्वम् इति। इतः प्रबलतरो रसस्य जयघोषः कतमः सम्भवति।

अथैष प्रश्नोऽवशिष्यते यदेकतः कुन्तको यदेदं मन्यते यत् 'सालंकारस्य काव्यता' इति'वक्रोक्ति' काव्यजीविनम इति च। अपरतश्चैवेदमपि मन्यते यद् रसः काव्ये परमतत्वमिति तदाऽमू मान्यते कथं समञ्जेताम्? उभयोर्वास्तविकः कः सम्बन्धः? कथञ्चोभयोस्तारतम्यं निर्णीयतेति। अयं प्रश्नोऽपि न दुरूत्तरः वक्रोक्तिसिद्धान्तेन काव्यस्य जीवितन्तु वक्रोक्तिरेवास्ति, वक्रोक्तिश्च यथा वक्रोक्तिजीवितग्रन्थस्य भूमिकायां वयं प्रतिपादयामः, काव्यकलापर्यायः, नोक्तिचमत्कारमात्रमिति। वक्रोक्तिः काव्यजीवितम्, इत्यस्याशयश्चायमेव यत्काव्यं स्वरूपतः कलैव नानुभूतिः यथा मनोवैज्ञानिकाः आलोचकाः अपि मन्यन्ते। अस्याः कलायाः रचनायै कविः शब्दार्थयोरनेका विभूतीरूपयुङ्क्ते तत्रार्थविभूतिषु मूल्यतमा रसविभूतिः। अतो रसः परमनिधिर्वक्रोक्तेः काव्यप्राणचेतना तु वर्तते एव। अस्याः वक्रतायाः समृद्धः प्रमुखाधारश्च रससम्पदास्ति। इत्थं रसेन सह वक्रोक्तेः सम्बन्धोऽपि प्रायः स एवास्ति यो ध्वनेः। काव्यस्यात्मा वक्रता,वक्रतासारसर्वस्वञ्च रस इति। उभयोस्तारतम्यविषये पुनः काव्यस्य कलापक्षभावपक्षयोः सापेक्षिकमहत्वप्रश्नः पुरः स्फुरति, स च प्रश्नोऽस्माभिर्दत्तोत्तरः एव।

औचित्यसिद्धान्तये नास्ति पृथग्विवेचनापेक्षा,तस्य हि कल्पना रससिद्धान्तसपरिवेशं नातिक्रामति।

एतेन विवेचनेन भारतीयकाव्यशास्त्रे प्रचलितैर्मूलसिद्धान्तैः सह रस सिद्धान्तस्य सम्बन्धः स्फुटीभवति, विषये चास्मिन उपयोगिनः केचिन्निष्कर्षाः शक्यन्ते प्रस्तोतुम्। रससिद्धान्तो भारतीयकाव्यशास्त्रस्य प्राचीनतमो व्यापकतमो मान्यतमश्चैव सिद्धान्तः। प्रारम्भे काचिदीदृशी भ्रांतिरुदपद्यत यद्रसस्य विभावानुभावादीनामुपस्थापनं नाट्य एव सम्भवतीति तस्य वास्तविक क्षेत्रं नाट्यमेवास्ति। अस्या एव भ्रान्तेः परिणामे काव्यक्षेत्रे शब्दार्थपरिधौ रसभिन्नस्यात्मभूतस्य तत्वस्यानुसन्धानं प्रारभ्यते,शब्दार्थगतचमत्कारस्य च द्वे प्रमुखे रूपे.. अलंकारो रीतिश्चैव पुरः समुपातिष्ठताम। परमियं भ्रान्तिः सत्वरमेव निराकृता,शब्दार्थक्षेत्रे एव च विभावादिप्रस्तुतेः सम्भावनाऽजायत। आनन्दवर्धनेन ध्वनेरुद्भावनया शब्दार्थयोर्निहितानां शक्तिनामुद्घाटनेन व्यञ्जनया विभावाद्युपस्थापनस्य नाट्यसामग्र्यभावेऽपि पूर्तिः। कृता। अभिनवगुप्तेन तथ्यमिदं विशदतरीकृतम्। काव्येन सह रसस्योचितः सम्बन्धः समस्थाप्यत, शब्दार्थयोश्च सन्दर्भ एव रससिद्धान्तस्य पूर्णा प्रतिष्ठा जायत।

ध्वनिस्थापनात्पूर्वमलंकार...रीतिसिद्धान्तानामन्तर्गततयापि रसस्यैकान्तात्यन्ततो नोपेक्षाऽभूत्। अलंकारवादिभिः रसवदलंकाररूपेण रीतिकारेण च रीतेराधारभूतानां गुणानां पोषकत्वरूपेण रसः शब्दार्थरूपस्य काव्यस्य शोभाधायक धर्मतया स्वीकृतोभूत। स्वनिष्टयनात्स्यमापे चिन्ताधारेण वक्रोक्तिसिद्धान्तरूपेण प्रकाशमागमत्। कुन्तकेन यद्यपि वक्रतायाः एव काव्यप्राणचेतनात्वममानि, तथापि रसं प्रति तस्य मनस्यवाधमाकर्षणमभूतं। रसलोनवक्रतायाः समृद्धेर्मुख्याधारतयांगीकृतः।

इत्थं भारतीयकलावादः क्रमशोऽलंकाररीतिवक्रोक्तिसिद्धान्तेषु प्रस्फुटितः, वक्रोक्तिप्रकल्पनायाञ्च तस्य कात्स्र्न्येन विकासि रूपं पुरःसमागतम्। एषु सिद्धान्तेषु सारतः काव्यं कलात्वेनामन्यत, अनुभूतिश्च तत्पोषकत्वरूपेण।

अपरतः सम्यक् प्रतिष्ठिते रससिद्धान्तेऽपि कलाया अलंकाररीतिप्रभृतीनितत्वान्युचित तयोपायुज्यन्त। सामान्येनालंकारा आभूषणसदृशतया रीतयश्चावयवसंस्थान विशेषतसामानतयाऽभ्यमन्यन्त, परमियमेका स्थूलकल्पनासीत् तत्वदृष्टया गुणालंकारादिकलोपकरणानि विभावादिसाधारणीकरणे भावस्यव्यक्तितंसंसर्गमुक्तिपूर्वकं मास्वादविषयतोपादने चोपयोगीन्यावश्यकानिवाऽमन्यन्त। शब्दार्थयोः कलात्मकं प्रयोगं विना विभावादीनां साक्षादुपस्थापनैव न सम्भवति, न चापि तेषां साधारणीकरणम्. . देशकालबन्धनमुक्तसर्वसहृदयगम्यरूपकल्पनेत्यर्थः। इदं विना स्थायिभावस्य निर्विघ्न प्रतीतिर्न सम्भवति। अतोऽलंकारगुणरीतिबिम्बविधानप्रबन्धन्वकल्पनादीनि सर्वाण्यपि रसोपकरणानि सन्ति, रस प्रतीतये च तान्यपरिहार्यतयाऽपेक्ष्यन्ते इति।

अलंकाररीतिवक्रोक्तीनां रसेन सह स एव सम्बन्धोऽस्ति यः किलाधुनिकालोचनाशास्त्रीयशब्दावल्यां काव्यान्तर्गस्य कलातत्वस्य तदंगतेनानुभूतितत्वेन सह वरीवर्ति। काव्यगतयोरुभयोरपि समन्वयः समपेक्ष्यते। वस्तुतोऽद्य तु तयोरुभयोस्तादात्म्यमेव काव्यमिति मन्यते। कलां कलात्मिकामभिव्यक्तिं विना वा भावविभूतिः केवलानुभवविषय एव भवति, भावनासंस्पर्श विना च कला शब्दार्थकेलिमात्रम्। उभयोरप्यतिवादेन हानिरभूत् कलाक्षेत्रे त्वतिवादेननर्थो भवत्येव। परं रसविषयकोऽप्यतिवादो नमान्यतामर्हति। यथा भावविरहिता कला काव्यं न भवति तथैव केवलो भावोऽपि न काव्यम्। तथा सतिहि प्रतिव्यक्ति हर्षविषादुद्रेकः काव्यं स्यात्।

ध्वनिरसयोः सम्बन्धस्त्वन्तरंगतरः, तयोह्युभयोः प्रकल्पना सहृदयनिष्ठास्ति उभयोः केवलमियान् भेदो यद् रससिद्धान्तो यत्र कल्पनात्मकभावनां कवित्वस्य प्राणतत्वं मन्यते, तत्र ध्वनिसिद्धान्तो भावरञ्जितां कल्पनां तथेति। अयञ्च भेदोवस्तुतस्तया सूक्ष्मोऽस्ति। यत्कालान्तरेणास्यैकविधो लोपः एव जातः। परं यद्यनयो पृथगस्तित्वं स्वीकरणीयमस्ति तदा भेदोऽयमवधेय एवं स्यात्।

# 5-औचित्यम्..........

औचित्यसिद्धान्तस्य विकासो रससिद्धान्तादेव जातः अतोऽयं तदंगमेव। रसापरिधावेवौचित्यस्य सत्तासार्थकते स्तः। रसः काव्यस्यात्मेत्येतत्प्रसंगे औचित्यसिद्धान्तस्यापि चर्चा क्रियते परं नौचित्यं कोऽपि प्रथग्भूतः सिद्धान्तः। औचित्यस्य भावना रसध्वनिप्रभृतिसकलकाव्यतत्वानां मूलभावना वर्तते। प्रयत्नैः सर्वैरपि आलङ्कारिकैः औचित्यं गोपायितुं स्वस्वकृतिषु सङ्केतः कृतोऽस्ति। क्षेमेन्द्रेण औचित्यस्य विचारार्थ सविस्तरं, ग्रन्थ एवैकः स्वतन्त्रो विरचितः। स आह—

'औचित्यस्य चमत्कारकारिणश्चारुचर्वणे।
रसजीवितभूतस्य विचारं कुरुतेऽधुना।।' (का. 3)

औचित्यस्य व्याख्या तेन विहितेत्थम्—

'उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते।।(का. 7)

पदे, वाक्ये, अर्थे, कारकेषु, लिङ्गेषु, वचनेषु रसे चैतदौचित्यं प्रदर्श्य वस्तुतः क्षेमेन्द्रो भृशं साहित्यरसिकानुपचकार।

परमत्रेदं च प्रकटीकरणं युक्तमेव भवेद् यदौचित्यस्य मूलतत्वमानन्दादेवोन्मीलिततामगमत्। स ब्रूते—

अनौचित्यात् ऋते नान्यद् रसभङ्गस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपनिषत्परा।।'

परम् आचार्यादानन्दवर्धनादपि प्रागौचित्यं काव्यस्य मूलतत्वं मतमभूत्।

इत्थं रससिद्धान्तो व्यापकतमः सिद्धान्तोऽस्ति, तद्दृष्टिकोणे च विवेकपुष्टा सहिष्णुता प्राप्यते। अनुभूतिर्भवति अलंकाररीतिगुणवक्रतादिभिः सर्वैरपि साकं पूर्णतया सहयुङ्क्ते, सर्वैश्चैव सहयोज्यते। यत्र शब्दार्थाभ्यां सह भावनायाः सम्बन्धश्छिद्यते। अनया दृष्टया ध्वनिसिद्धान्तस्ततोऽप्युदारतरः कथ्यते, परमियमुदारता महार्धतायाति, अनया दातुः स्वरूपहानिर्भवति उदारता चाधमविशेषणाविशेष्यतां प्राप्नोति। तदीदृशया उदारतया किं प्रयोजनम्?

सहयोगाभावे यदा प्रतियोगस्य तारतम्यस्य वा प्रश्न उदेति। तदा रसस्वरूपमधिकं प्रकाशते। सिद्धान्तान्तराणां सन्दर्भे रसस्थितेर्मानचित्रमित्थं प्रकल्पते......

अलंकारसिद्धान्तेः शब्दार्थचमत्कारः+आनन्दः काव्यास्वादः

रीतिसिद्धान्ते..शैलीसौन्दर्यम्+आनन्दः...काव्यास्वादः

वक्रोक्तिसिद्धान्ते..कविव्यापारःकलाया+आनन्दः काव्यास्वादः

ध्वनिसिद्धान्ते..रमणीयकल्पना+शब्दार्थमयी अभिव्यक्तिः +आनन्दः काव्यास्वादः।
ओचित्यसिद्धान्ते.. भावप्रेरितो विवेकः+शब्दार्थमयी अभिव्यक्तिः+ आनन्द काव्यास्वादः।
रससिद्धान्ते. कल्पनात्मकभावना+शब्दार्थमयी अभिव्यक्तिः +आनन्दः काव्यास्वादः।
एषु सर्वेष्वानन्दतत्वं समानम्। तस्मिन्निष्कमिते अलंकाररीतिवक्रोक्तिध्वन्यौचित्यैः सह रसतरताम्यस्यार्थो भवति क्रमशः उक्तिचमत्कारशैलीकलारमणीयकल्पनाभावप्रेरितविवेकैः सह कल्पना रमणीयभावनायास्तारतम्यम्। अस्य च निर्णयो न दुष्करः वस्तुतः काव्यान्तर्गततया सर्वेषां महत्वे सत्यपि एतेषु किमपि तत्वं स्वातन्त्र्येण भावसमतां कर्तुं न प्रभवति। सम्पूर्णस्य हि जीवनस्य प्रेरकं तत्वं भावः, जीवनेरसोभावाभिषेकेणैवायाति, चारित्र्यसमृद्धः जीवनमूल्यानाञ्चाधारो भाव एव आनन्दस्यापि भाव एव प्रबलं गम्भीरञ्च रूपमस्ति यद् भावमाध्यमेन सिद्धयति। भावासम्पृक्तकल्पनायाश्चमत्कारः शैल्याउक्तेर्वा चमत्कारः कुतूहलादधिको न भवति । तर्कातिरिक्तस्यानुभवस्याधारेणापीदं स्वतः सिद्धम,यत्काव्यस्य तदेव तत्वं स्थायी भवति, यत्सहृदयस्य संस्कारे वसति तच्च तत्वं भावोऽस्ति। अतः काव्यस्य समस्तानि तत्वान्तराणि अतिशयितस्य भावस्य गौरवमक्षुण्णमस्ति,आसीद् भविष्यति च। एतेनैपानुपातेन काव्यस्य विभिन्नसिद्धान्तापेक्षया रससिद्धान्तस्य महत्वमप्यक्षुण्णमस्ति, आसीत् भविष्यति च ।

---